श्रीः

श्रीमते नारायणाय नमः

सुबालोपनिषत् ।

[ओं पूर्णमद इति शान्तिः ॥]

हरिः ओम्—तदाहुः—किं तदाऽऽसीत्

श्रीः

श्रीमते रामानुजाय नमः

[श्रुतप्रकाशिकावक्त्रे व्यासायास्तु नमस्क्रिया ।
यः संग्रहाय दयया श्रुतदीपमदीपयत् ॥]

सुबालोपनिषद्विवरणम्

वेदव्यास-श्रीमत्सुदर्शनभट्टारक-

श्रीश्रुतप्रकाशिकाचार्यविरचितभाष्यम् ।

विशुद्धविज्ञानविशेषकारणं रजस्तमःकल्मषदोषनाशनम् ।
सदैव रामानुजपादपङ्कजं स्मरामि नौमि प्रणमामि चाऽऽदरात् ॥ १
सौबालोपनिषद्धृदि विनिहितमर्थं सुपुष्कलं गहनम् ।
अनुसन्दधीमहि वयमक्लिष्टमृजूपपत्त्या च ॥ २ ॥

तदाहुरिति । तत् वक्ष्यमाणं वाक्यजातमध्येतारोऽधीयत

श्रीः

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः

नारायणाद्रिशिखरेऽत्र निरीक्ष्यते यो
नारायणः कमलयाऽद्भुतमासुबालम् ।
तं ब्रह्मरुद्रमुखसर्वसृजं सुबाल-
श्रुत्यन्तघुष्टमखिलान्तरमाश्रयामि ॥

तस्मै स होवाच—नसन्नासन्नसदसदिति ।

इत्यर्थः । यद्वा शिष्याचार्यभावेन स्थिता प्रष्टारः प्रतिवक्तारश्च ब्रह्मवादिन आहुरित्यर्थः । तत्र कस्यचित् शिष्यस्य प्रश्नवचनं दर्शयति **किं तदासीदिति** । तदा सृष्टेः पूर्वं किं जगत्कारणत्वेनावस्थितमासीदित्यर्थः । **तस्मै स होवाच । तस्मै** प्रष्टृत्वेन प्रकृताय शिष्याय सः प्रष्टव्यतया बुद्धिस्थ आचार्यः उवाचेत्यर्थः । हेति पूजायाम् । अत्र प्रष्टा रैक्वः, प्रतिवक्ताऽऽचार्यो घोराङ्गिरा इति व्यक्तीभविष्यति । संक्षेपतः कारणविषयं प्रतिवचनं दर्शयति **नसन्नासन्नसदसदिति** । तत्र (अत्र?) सदादिपदानि **नञ्शब्दवत्** नशब्देन समस्तानि । **नशब्दश्च** तदन्यवाची । सच्छब्दः कार्यविश्वचेतनपरः, 'इदं सर्वमसृजत' इत्युपक्रम्य, 'सच्च त्यच्चाभवत् विज्ञानञ्चाविज्ञानञ्च' इति कार्यविश्वचेतनविषये सच्छब्दस्य

श्रीभाष्यादेर्व्याक्रिया सार्वभौमी येषामेषा स्वादुवाचासुधानाम् ।
व्यासार्याणामेवमस्मद्गुरूणां विख्यातानां वन्दिषीयाङ्घ्रिपद्मम् ॥

उपनिषदो बृहदारण्यकान्ता इव सुबालोपनिषदियमपि सर्वैः समखण्डमहिता, सर्वजगत्कारणस्य ब्रह्मरुद्रादिकारणत्व—सर्वान्तर्यामित्व—नारायणत्व—दिव्यैकदेवत्वादिसम्प्रवर्णनेन सर्वाभ्योऽतिशयिता, परं परैरपि न व्याख्याता, साधु व्याकर्तव्येति विभाव्य, श्रीभाष्य-दीप-वेदार्थसंग्रहादिव्याख्यानविख्यातवैदुष्यैर्विशदमधुर-विशिष्टार्थव्युत्पादकग्रन्थसुधावर्षणालङ्कर्मीणैः वेदव्यासापरनामधेयैः श्रीसुदर्शनभट्टारकैर्भाष्यमस्या अभाषि । परं तद् विवरणमस्याः षोडशखण्डात्मिकायाः पञ्चमखण्डपर्यन्तमेव सर्वत्र लक्ष्यते । शिष्टोऽप्येतदुपनिषद्भागः श्रीभाष्यादौ एतद्भाष्ये च यथापेक्षमुदाहृत, यत्रैव नारायणत्वादि न प्रतिबोधितमिति सोऽपि सार्थोऽधिगन्तव्य एव ।

प्रयुक्तत्वात् । असच्छब्दश्च कार्यावस्थाचेतनपरः। कार्यावस्थचेतनविलक्षणं कार्यावस्थाचेतनविलक्षणमुभयात्मकजगद्विलक्षणं परमे व्योम्नि स्थितं परं ब्रह्म कारणमासीदित्यर्थः । ब्रह्मणः परमव्योमसंबन्धो हि वक्ष्यते, 'परस्तान्नसन्नासन्नसदत्' इति । अस्य वाक्यस्य सदादिनिषेधमात्रपरत्वे, 'तस्मात् तम. संजायते' इति तच्छब्देन कारणतया कस्यचित् परामर्शायोगात् । किञ्चिदपि नास्ति चेत्, तस्मादिति किं परामृश्यते? सदसदनिर्वचनीयमज्ञानमिति चेत्, तदयुक्तम् । अस्यामेवोपनिषदि, 'अपुनर्भावा(भेद?) याण्डकोशं भिनत्ति' इत्यारभ्य, 'मृत्युं भिनत्ति मृत्युर्वै

ननु तदाहुरिति प्रष्टृप्रतिवक्तॄणां बहूनामुक्तिरवक्रान्ता। एवञ्च, किं तदासीत् इति प्रश्नमाहुः, तत्र नसन्नासन्नसदसदिति प्रतिवचनञ्चाहुरिति सुवचम् । तत्र मध्ये तस्मै स होवाचेति कथमित्यत आह अत्र प्रष्टा रैक्व इत्यादि । यद्यप्येवं श्रुत्याशयः स्यात्—'ब्रह्मजिज्ञासया प्रवृत्ताः सर्वेऽपि प्रष्टारः, किं तदाऽऽसीदित्येव प्रश्नमाहुः। तत्र प्रतिवक्तॄणामुक्तिर्भिद्यते, ब्रह्म वा इदमग्र आसीत्, आत्मा वा इदमग्र आसीत्, एको ह वै नारायण आसीत्, असदेवेदमग्र आसीत् इत्येवम् । तत्र रैक्वाय प्रष्ट्रे घोराङ्गिरस उत्तरं तु विलक्षणम् नसदित्यादि'इति । तथाच आहुरिति प्रश्नमात्रान्वयीति—तथापि स होवाचेत्येतावदनुक्त्वा तस्मै स होवाचेति वचनात् प्रश्नवाक्यमपि रैक्वैककर्तृकतया व्याख्यातमिति ध्येयम् ।

उभयात्मकेति । न चैवं नसन्नासदित्युक्तस्यैव नसदसदित्युक्तौ पुनरुक्तता स्यादिति वाच्यम्--समष्टिकार्यभूतचेतन-तादृशाचेतन-व्यष्टिरूपचेतनाचेतनात्मकजगद्रूपत्रयवैलक्षण्यस्य त्रिभिः पदैर्विवक्षणादपौनरुक्त्यात् ।

तस्मात् तम सजायते ।

परे देव एकीभवति । परस्तान्नसन्नासन्नसदसत्' (1) इति देश काल्त स्वभावतो वा मुक्तप्राप्यत्वकथनायोगात् । 'मृ यु दहति परस्तान्नसन्नासन्नसदसत्' इति ज्ञानाभिदाहात् मृत्यो परत्वाभिधानायोगाच्च । अनिर्वाच्य हि ज्ञाननिवर्त्यमभिमतम् । परस्ताच्छब्दवैयर्थ्याच्च । मृत्यो रपि सान्ततया परत्वविशेषण हि न घटते । 'मृत्युर्वै परे देव एकीभवति परस्तान्नसन्नासन्नसदसत्' इति देशत कालत स्वभाव ो वा सर्वेश्वरात् परत्वमनिर्वचनीयस्यास्य ानुपपन्नम् । जगत्कारणब्रह्मपर वे तु मुक्तप्राप्य त्वादिक सर्वमुपपन्नम् । इतिशब्द प्रतिवचनसङ्क्षेपसमाप्तौ ।

अथ विस्तरेण सृष्टिमाह तस्मात् तमः सजायते इति । तस्मात् सर्वविलक्षणत्वेन प्रतिपादितात् परस्मात् ब्रह्मण अतिसूक्ष्म प्रधानतत्त्व सजायते सञ्जातम् । विभक्तमित्यर्थ । ननु पूर्वमविभक्तस्य हि पश्चा द्विभाग । ब्रह्मण चिदचिद्विलक्षणतया तेन सत्पूर्वमपि अविभागाभावात् विभागोक्तिर्न घटते ॥ न । अस्यामेवोपनिषदि तमोमृत्युशब्दवाच्यस्य सूक्ष्माचिद्वस्तुन परब्रह्मशरीरत्व वक्ष्यते । अत तमश्शरीरके ब्रह्मणि

देशत कालत स्वभावतो वेति । मृ यु भिनत्तीति मृत्युभेदनानन्तर मुक्तप्राप्यत्वमुक्तम् । परस्तादिति मृ युताऽनाकार्तदेशो मुक्त प्राप्यत्वमुक्तम् । तदुभयमपि अज्ञानस्य न भवति । अस्तु तावदिदम्, यत् देशत कालत इति । अज्ञान मुक्तप्राप्य नैव भवतीति स्वभावतोऽपि तद्वर्णनायोग एवेत्यर्थ ।

ननु तमसो भूतादिरित्यादिपूर्वरितनवाक्येषु सजायत इत्यस्यास्यैवानुषङ्गात् तत्रोत्पत्त्यर्थकस्यास्य अत्र विभागपरत्वमयुक्तम् । अत ,

कार्योपयुक्तांशस्य प्रलयदशायामविभागो युक्तः । वक्ष्यते, 'तम एकीभवति' इति । अतः सर्गकाले विभागोऽप्युपपन्नः। विभागश्च न छित्वा भित्वा क्रियते । अपितु केनचिदाकारेण त्याग्वृत्तिर्विभागः । परब्रह्मप्रकारभूतकार्योपयोग्यंशस्य कार्यानुरूप्यापत्तिर्विभागः । स च परमात्मप्रेरणाधीन. । परमात्मनोऽचिच्छरीरकत्व तत्प्रेरकत्वञ्च भगवता मनुना स्पष्टमुक्तम्, 'आसीदिदं तमोभूतम्' इत्यारभ्य 'प्रादुरासीत् तमोनुदः । सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः' इति। एतदुक्तं भवति—समस्तचिदचिद्विलक्षणस्वरूपात् तमश्शब्दवाच्यातिसूक्ष्मप्रधानशरीरकात् परब्रह्मणः कार्योत्पादनाय कश्चित् तमस्तत्त्वांशः तत्संकल्पाद्विभक्तोऽभूदिति ।

श्रुतिस्वारस्याच्च तमस्त्वावस्थापन्नमुत्पद्यत इत्येवार्थोऽस्तु इत्यत्राह 'वक्ष्यते तम एकीभवति इति। अक्षरं तमसि लीयते इत्यन्तं लीयत इति प्रयुज्य, तमः पर इति वाक्ये एकीभवतीति प्रयोगात् तमस्त्वमक्षरत्वादिवत् न प्रहीयत इति प्रतीयते । अतः तमस्त्वावस्थाविशिष्टतयोत्पत्त्ययोगात् विभागरूप एवार्थः प्रथमवाक्ये ग्राह्यः । तत्राचेतनस्य तमसः चेतनेन देवेनैक्यायोगात् देवापृथक्सिद्धेन अचेतनद्रव्येण अविभक्ततमोनाम्ना सहैक्यमेव विवक्षितमिति सृष्टयारम्भकाले इहोक्तो विभागोऽपि तादृशाचेतनद्रव्यादेव विवक्षितः। ततोऽस्य विभागो नाम कार्यानुरूप्यापत्तिः कार्यापेक्षितसामग्रीसंपन्नत्वम्। सा च सामग्री भगवत्संकल्परूपप्रेरणादिः । आसीदिदं तमोभूतमिति। एतन्मनुवचनानामर्थः श्रुतप्रकाशिकायां (जिज्ञासा-)विशदमनुसंधेयः। अनेन प्रलयकाले तमस्त्वावस्थासद्भावः स्पष्टमवगम्यत इति न तस्य जनिवर्णनं युक्तमित्यपि दर्शितम् । श्रुत्यन्तरञ्च, 'नासदासीन्नो सदासीत् तदानीं तम आसीत् । तमसा गूढमग्रे प्रकेतम्' इति ।

तमसो भूतादिर्भूतादेराकाशमाकाशाद्वायुः वायोरग्नि-

तमसो भूतादिरिति । **भूतादिः** आकाशादिभूतानामादिभूतः तामसाहंकार.। तस्माद्विभक्तात् तमसोऽक्षराव्यक्तमहदवस्थाद्वारेण भूतादिरभूदित्यर्थ । 'भूतादिर्महति लीयते महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते' इति प्रलयक्रमस्य वक्ष्यमाणत्वात् तमसो भूतादिकारणत्व तत्त्वान्तरव्यवधानेनेत्यवगम्यते । **भूतादि**शब्द सात्त्विकाहङ्कारराजसाहंकारयोरपि प्रदर्शनार्थ । 'वैकारिकस्तैजसश्च भूतादिश्चैव तामसः। त्रिविधोऽयमहकारो महत्तत्त्वादजायते'इति भगवत्पराशरस्मरणात्।

भूतादेराकाशमिति । शब्दतन्मात्रावस्थापूर्वकमाकाशमुत्पन्नमित्यर्थ । 'आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते' इति अस्यामेवोपनिषदि पञ्चभूतप्रलयदशाया तन्मात्रलयप्रतिपादनेन उत्पत्तावपि तन्मात्रोत्पत्तेरर्थसिद्धत्वात् । 'भूतादिस्तु विकुर्वाण शब्दतन्मात्रक तत । ससर्ज शब्दतन्मात्रादाकाश शब्दलक्षणम्' इति भगवत्पराशरवचनेन शब्दतन्मात्रादाकाशोत्पत्ते स्पष्टतर मवगतत्वाच्च । **आकाशाद्वायुरिति** । अत्रापि स्पर्शतन्मात्रपूर्वक वायुरुत्पन्न इत्यर्थ । 'आकाशस्तु विकुर्वाण स्पर्शमात्र ससर्ज ह । बल वानभवद्वायुस्तस्य स्पर्शो गुणो मत' इति पराशरोक्ते । **वायोरग्निः अग्नेरापः अद्भ्यःपृथिवीति** । अत्रापि रूपतन्मात्रादग्नेरुत्पत्ति, रसतन्मात्रादपामुत्पत्ति, गन्धतन्मात्रात् पृथिव्युत्पत्तिरपि सिद्धा । 'ततो वायुर्विकुर्वाणो रूपमात्र ससर्ज ह । ज्योतिरुत्पद्यते वायोस्तद् रूपगुणमुच्यते । ज्योतिश्चापि विकुर्वाण रसमात्र ससर्ज ह

खेरापोऽद्भ्य पृथिवी । तदण्ड समभवत् ।

चाऽम्भासि गन्धमात्र ससर्जिरे' इति पुराणवचनोपबृंहितत्वात् । वायोरग्निरित्यत्राग्निशब्द तेजोमात्रपर । 'आपस्तेजसि लीयन्ते' इति अत्रैव प्रलयवाक्ये तेजश्शब्दश्रवणात्, 'तत तेजोऽसृजत' इति श्रुत्यन्तरैकार्थ्यात्, 'ज्योतिरुत्पद्यते वायो' इति स्मृतिवचनाच्च ।

तदण्ड समभवदिति तच्छब्द पृथिव्यन्ततत्त्वजातपर । *महदादिपृथिव्यन्त तत्त्वजातमण्डात्मना परिणतमभूदित्यर्थ* । '*महदाद्या विशेषान्ता* ह्यण्डमुत्पादयन्ति ते' इति स्मरणात् ।

ननु 'तन्मात्राणि भूतादौ लीयन्ते इति तन्मात्राणा युगपत् प्रलयश्रवणात् उत्पत्तिरपि युगपदित्यवगम्यते । युगपत् उत्पन्नेभ्य तन्मात्रेभ्य परस्परानपेक्षेभ्य आकाशाद्युत्पत्ति । अत एव आकाशादीना न परस्परकारणत्वम् । तथा सति, 'अष्टौ प्रकृतय षोडश विकारा' इति विकाराणा षोडशसङ्ख्या करन घटते । अन्यथा आकाशादीना चतुर्णां प्रकृतित्वेन [प्रकृतीना] विकाराणाञ्च द्वादशत्व स्यात । तन्मात्राणा युगपदुत्पत्त्यङ्गीकारे लयश्रुत्यनुरोधश्च भवति। 'आकाशाद्वायु ' इत्यादिवाक्येषु आकाशादिशब्दा पञ्चम्यन्ता तन्मात्रावस्थाकाशादिभूतपरा इति —

न परस्परकारणत्वमिति । वाय्वादीना साक्षात् आकाशादिकारणजन्यत्व वा तज्जन्यतन्मात्रादिकारणत्व वा नेत्यर्थ । तथासतीति । तत्कारणत्वाभावे सत्येवेत्यर्थ । तन्मात्रावस्थाकाशादिभूतपरा इति । ननु तन्मात्रेति शब्दतन्मात्रग्रहणे तज्जन्यत्व वायो कथम् । शब्दतन्मात्रग्रहणे तदवस्थत्वमाकाशस्य कथमिति चेत्—पूर्वं परस्परानपेक्षेभ्य इत्यनेन वायूत्पत्तौ शब्दतन्मात्रापेक्षा न वार्यते । किंतु

अत्रोच्यते—न तावत् तन्मात्राणां युगपदुत्पत्तिः श्रुता ॥ युगपत्प्रलयश्रवणात् कल्पनीयेति चेन्न—प्रलयस्यापि यौगपद्याश्रवणात् । लीयन्त इति हि श्रूयते, न तु, 'युगपल्लीयन्ते' इति । अत क्रम-यौगपद्यसाधारणी इयं श्रुतिः । यथा, 'यतो वा इमानि भूतानि जायन्ते यत् प्रयन्त्यभिसंविशन्ति, 'यस्मिन्निदं सञ्च वि चैति सर्वम्' इत्यादि । तत्रापि यौगपद्यविवक्षा अस्तीति चेत्—महदहङ्कारादि तत्त्वानां देवमनुष्यादीनाञ्च प्रमाणान्तरावगतसर्गप्रळयक्रमो बाध्येत । अतो युगपत्प्रलय(या ?)श्रवणात् युगपदुत्पत्तिकल्पनं तन्मात्राणाम युक्तम् । न केवलं कल्पकाभावात् युगपदुत्पत्तिकल्पनमयुक्तम्, बाधक-सद्भावाच्चायुक्तम् । न हि श्रुतिक्रमविरोधेन यौगपद्यकल्पनमुपपद्यते ।

तथा हि—'भूतादेराकाशमाकाशाद्वायुः वायोरग्निः' इत्यादि वाक्येषु पञ्चम्यन्तानामाकाशादिशब्दानां प्रसिद्धाकाशादिमात्रपरत्व प्रहाणेन तन्मात्राकाशादिपरत्वमस्वरसम् । स्वारस्यबाधाभावेऽपि क्लिष्टार्थ कल्पनमयुक्तम् । प्रथमान्तानां पञ्चम्यन्तानाञ्चाऽऽकाशादिशब्दानां मर्थवैरूप्यञ्च स्यात् ॥ प्रथमान्तानामपि तन्मात्रपरत्वात् नार्थवैरूप्यमिति चेत्—तर्हि भूतादेः शब्दतन्मात्रमुत्पन्नम्, शब्दतन्मात्रात् स्पर्शतन्मात्रमुत्पन्नमित्ययमर्थ उक्तः स्यात् । तदानीमुत्तरोत्तरतन्मात्राणां पूर्वपूर्वतन्मात्रसृष्टत्वात् तेषां युगपदुत्पत्तिर्बाध्येत । तन्मात्रेभ्यः प्रसिद्धाकाशाद्युत्पत्तिः निष्प्रमाणिका च स्यात्, 'एतस्मा

सिद्धान्ते स्पर्शतन्मात्रादेः स्वोत्पत्तौ आकाशादिद्वारा शब्दतन्मात्रा च पेक्षत्वं यत्, तदेव वार्यत इति इह आकाशपदं शब्दतन्मात्रपरमिति ।

ज्जायते प्राणः....खं वायुर्ज्योतिरापः' इत्यादौ कस्मिंश्चिदपि वेदवाक्ये तन्मात्रेभ्यः खाद्युत्पत्तिश्रवणाभावात्। प्रथमान्तानां शब्दानां तन्मात्रवाचित्वमप्ययुक्तम्; 'अद्भ्यः पृथिवी' इत्यनेन समत्वात्। न हि पृथिवीशब्दो गन्धतन्मात्रपरः; अनन्तरवाक्यविरोधात्। 'तदण्डं समभवत्' इति अस्यामुपनिषदि, अन्यत्र 'पृथिव्या ओषधयः' इत्येवानन्तरं श्रूयते। न हि गन्धतन्मात्रात् अण्डोत्पत्तिश्च भवति। किञ्च युगपदुत्पन्नेभ्यः तन्मात्रेभ्यः पञ्चभूतोत्पत्त्यभ्युपगमे, 'पृथिव्यप्सु प्रलीयते' इति प्रलयश्रुतिश्च विरुध्यते। पृथिव्याः तत्कारणस्य गन्धतन्मात्रस्य च सलिलकारणकत्वाभावात्। एवम् 'आपस्तेजसि लीयन्ते' इत्यादिभिश्च विरोधः। उत्तरोत्तरभूतानां पूर्वपूर्वभूतप्रभूतत्वाभावात्। अतः तन्मात्राणां युगपदुत्पत्तिः कल्पकाभावात् सर्गप्रलयपरानेकवाक्यविरोधाच्चानुपपन्ना। छान्दोग्ये च, 'तत् तेजोऽसृजत-तत् तेज ऐक्षत—तदपोऽसृजत—ता अन्नमसृजन्त' इति तेजोबन्नवाचिशब्दानां तन्मात्रपरत्वे स्वारस्यभङ्गः, तस्मिन् सोढेऽपि युगपदुत्पत्तिविरोधश्चावर्जनीय।

'आकाशाद्वायुः' इत्यादिवाक्यानां केचिदेवं निर्वाहमिच्छन्ति—भूतादेराकाशमाकाशाद्वायुः', 'आत्मन आकाश संभूतः, आकाशाद्वायुः' इत्यादिवाक्येषु आकाशादयः शब्दाः अविशेषेण स्थूलसूक्ष्मवस्तुतद्भूतवाचिनः। अनोऽर्थवैरूप्यादिदोषा न स्युः। तत्रार्थसामर्थ्यात् सूक्ष्मांशस्यैव स्थूलभूतमनन्तरं प्रति कारणत्वं सिद्ध्येत्—इति। इदानीमपि तन्मात्राणां युगपदुत्पत्तिः दूरतः परित्यक्ता। किञ्च—'आकाशाद्वायुः' इत्यादीनि वाक्यानि मिथुनात् मिथुनोत्पत्तिवचनानि।

पञ्चम्यन्ताना प्रथमान्तानाञ्च पदानामुभयवाचित्वात् । एव सति माता पित्रोरिव पुत्रदुहित्रोरिव च स्थूलसूक्ष्मभूतयोर्न परस्परकार्यकारणभाव सिद्धचेत् । पुत्रदुहितरौ प्रति पित्रोरन्यतरस्येव स्थूलाकाशस्यापि स्पर्श मात्र वायुमपि प्रति कारणत्व स्यात् । सूक्ष्मस्येव स्थूलाकाशस्यापि प्रकृत्युत्पन्नस्य स्थूल सूक्ष्मञ्च वायु प्रति हेतुतयाऽन्वयस्य अविशेषेण पञ्चमीप्रतिपन्नत्वात् स्थूलाकाशस्य स्पर्शमात्रस्थूलवायुजननायोग्यत्वे प्रमाणान्तराभावात् । शास्त्रैकसमधिगम्यो ह्ययमर्थो यथाशब्द स्वीकार्य । अत अर्थसामर्थ्यादभिमतव्यवस्था दुर्लभा । तथा, 'वायुराकाशे लीयते' इत्युक्ते स्पर्शतन्मात्रवाय्वो स्थूलाकाशेऽपि लय प्रतिपादित स्यात् । अत सर्व परमत व्याकुल स्यात् ।

तस्मात् प्रमाणान्तरागोचरे जगत्सर्गप्रलयादौ शब्दाना स्वरस-सिद्ध एवार्थ स्वीकार्य स्वप्रकरणस्ववाक्यानुगुण्यादुपबृंहणवचनानु गुण्याच्च प्रसिद्धानामेवाकाशादीना तन्मात्रव्यवहिता सृष्टिरित्यभ्युप गन्तव्य । 'तमसो भूतादि , भूतादेराकाशम्' इत्यादिषु व्यवधानेऽपि कार्यकारणभावनिर्देशदर्शनात् ।

तर्हि, 'अष्टौ प्रकृतय षोडश विकारा ' इति श्रुते का गतिरिति चेत्—देशेऽस्मद्बृंहणनिपुणतरपरमर्षिसदर्शितैव गति । नास्माभि तद्विरुद्ध

तस्माभिरिति । अत्र अष्टौ प्रकृतय इति प्रकृतिमहदहङ्कारतन्मात्राणामेव विवक्षा षोडश विकारा इति पञ्चभूतैकादशेन्द्रियग्रहणम् । पञ्चेन्द्र चतुर्विंशतितत्त्वताव्ययद्वारस्य बहुग्रन्थसप्रतिपन्नत्वात् । कथमाकाशादीना चतुर्णां प्रकृतित्वेनापरिगणनमिति चेत्—विवक्षितस्यार्थस्य

निर्वहणेऽभिनिवेष्टव्यम् । भगवता वेदव्यासेन हि मोक्षधर्मे याज्ञवल्क्य-जनकसंवादे षोडश विकाराः प्रत्यक्षश्रुत्यन्तराविरोधेन दर्शिताः—

"अष्टौ प्रकृतयः प्रोक्ताः विकाराश्चैव षोडश ।
(?) तथा व्यक्तानि सप्तैव प्राहुरध्यात्मचिन्तकाः ॥
अव्यक्तञ्च महांश्चैव तथाऽहंकार एव च ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥
एताः प्रकृतयस्त्वष्टौ विकारानपि मे शृणु ।
श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणञ्च पञ्चमम् ॥
वाक् च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च ।
शब्दस्पर्शौ च रूपञ्च रसो गन्धस्तथैव च ॥
एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु ।

सत्त्वाभावात् । नात्र प्रकृतित्वं कार्यद्रव्यारम्भकत्वमात्रम्; किंतु पाञ्चभौतिकत्वस्य शरीरे प्रसिद्धतया पञ्चभूतगतशब्दादिसर्वगुणाश्रयतया इन्द्रियाश्रयतया च तस्योपलभ्यमानत्वाच्च विकारभूते शरीरे उपलभ्यमानानि तत्त्वानि विकारा इत्युच्यन्ते, अन्यानि तु प्रकृतिमहदहङ्कारतन्मात्राणि तथानुपलभ्यमानत्वात् उपलभ्यमानतत्त्वप्रकृतित्वाच्च प्रकृतय इत्युच्यन्ते इति तात्पर्यवर्णनसंभवात् । अतः सांख्याभिमतरीतिमुपेक्ष्य भगवत्पराशरोपबृंहितप्रक्रियानुरोधेन तत्त्वोत्पत्तिवादस्य न, 'अष्टौ प्रकृतयः' इति श्रुत्यादिविरोध इत्यादिवर्णनं यद्यपि संभवति—अथाप्यासिद्धेऽपि उपपन्नेऽपि नास्माभिरभिनिवेशः कार्यः, व्यासार्यादिवचनपर्यालोचने अष्टौ प्रकृतय इत्यस्याभिप्रायान्तरावगमादिति भावः ।

तथा व्यक्तानीति युक्तः पाठः; न तु अथाव्यक्तानीति । वस्तुतः, आसां तु सप्त व्यक्तानीत्येव संमततमः पाठः (मोक्ष—३१५.) ।

दशेन्द्रियाण्यथैनानि सविशेषाणि मैथिल ! ॥
मन षोडशमित्याहुः अध्यात्मगतिचिन्तकाः''   इति ।

अत्र ज्ञानप्रवृत्तिकारणानीन्द्रियाणि तद्विषया शब्दादयश्च तत्त्वान्तरानारम्भकत्वात् षोडश विकारा इति प्रतिपादितम् । 'एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु' इति वैयधिकरण्यनिर्देशात् विशेषशब्दः शब्दस्पर्शादिगुणमात्रपर । 'शान्ता घोराश्च मूढाश्च विशेषाः तेन ते स्मृताः' (वि पु १.२) इत्यत्र तदभावात् विशेषशब्दो गुणिपरः । पटस्य शुक्लं, पट. शुक्ल इत्यादिषु शुक्लादिशब्दानामिव विशेषशब्दस्यापि गुणपरत्वं गुणिपरत्वञ्च युक्तमेवेति प्रयोगवशादवगम्यते । नन्वेवं सति चतुर्विंशत्याधिक्य स्यादिति चेन्न, द्रव्यरूपाणा कार्यकारणाचित्त्वानामव्यक्तादीना चतुर्विंशतिसंख्यानतिरेकात् । 'अष्टौ प्रकृतयः षोडश विकारा·' इत्यादिवाक्यस्य तु द्रव्यैक्यपरत्वनियमो नास्तीति उपबृंहणवशादवगम्यते । अर्थान्तराणामनुपपन्नत्वाच्च ॥ आकाशादीनामपि प्रकृतित्वे, 'अष्टौ प्रकृतय ' इति श्रुत प्रकृतीनामष्टसंख्याकत्व न घटत इति चेन्न — तन्मात्राणा भूतेष्वन्तर्भावाभिप्रायेणाष्टसंख्यानिर्देशोपपत्ते ।

तथा वसिष्ठ-कराळजनकसंवादेऽपि भूततन्मात्रव्यतिरिक्ताना शब्दस्पर्शादीना विशेषशब्दोक्ताना षोडशविकारान्तर्भाव प्रतिपाद्यते—

"अव्यक्तमाहु प्रकृति परा प्रकृतिवादिन ।
तस्मान्महत् समुत्पन्न द्वितीय राजसत्तम ॥
अहङ्कारस्तु महत तृतीय इति न श्रुतम् ।
पञ्च भूतान्यहङ्कारादाहु सांख्यनिदर्शिन ॥

एताः प्रकृतयस्त्वष्टौ विकाराश्चापि षोडश ।

पञ्चैव च विशेषाश्च पञ्च पञ्चेन्द्रियाणि तु ॥ "(मो शां ३११)

इति। अत्र पञ्चानां भूतानां प्रकृतिषु परिगणनात् केवलविकारत्वमपास्तम्। विशेषशब्दस्य तन्मात्रपरत्वं तन्मात्राणां केवलविकारत्वञ्च न कस्यापीष्टम्। अतो विशेषशब्दः शब्दस्पर्शादिगुणमात्रपर इति परिशेषात् सामर्थ्याच्च सिद्धम्॥ 'पञ्च भूतानि' इति भूतशब्दः तन्मात्रपरः; 'विशेषशब्द आकाशादिपरः' इति चेन्न । अपवादाभावेऽपि भूतशब्दस्य क्लिष्टार्थकल्पनाऽयोगात् । विशेषशब्दो गुणेष्वक्लिष्टः । न केवलमुपबृंहणवचनस्थभूतशब्दस्यैव, श्रुतिवाक्यस्थाकाशादिशब्दानामपि तन्मात्रपरत्वे स्वारस्याभावः स्फुटतरः ।

एवमुपनिषद्वाक्यानां परमर्षिवचसाञ्चामुख्यार्थाश्रयणमर्वाचीनसांख्यदुर्निबन्धनम्; स्वरसवचनान्तरयुक्त्यन्तराभावात् । समीचीनं सांख्यम् — श्रुतिस्वारस्यानुगुणमिति अत्रैव दर्शितम्, 'आहुः सांख्यनिदर्शनम्'(र्शिनः)इति ।

तथा यमस्मृतौ विषयेन्द्रियाण्येव षोडश विकारा इत्युक्तम्—

"पञ्चविंशतितत्त्वज्ञो यत्रकुत्राश्रमे रतः ।
प्रकृतिज्ञो विकारज्ञः स दुःखात् परिमुच्यते ॥
मनो बुद्धिरहंकारः खानिलाग्निजलानि भूः ।
एता प्रकृतयस्त्वष्टौ विकाराः षोडशापरे ॥
श्रोत्राक्षिरसनाघ्राणं त्वक् च संकल्प एव च ।
शब्दरूपरसस्पर्शगन्धवाक्पाणिपायवः ॥
उपस्थपादाविति च विकाराः षोडश स्मृताः ।

चतुर्विंशकमित्येतत् ज्ञानमाहुर्मनीषिण ॥
पञ्चविंशकमव्यक्त षड्विंश पुरुषोत्तम ।
एतत् ज्ञात्वा तु मुच्यन्ते यतय शान्तबुद्धय ॥
अशब्दमरसस्पर्श रूपगन्धविवर्जितम् ।
निर्दु ख सुसुख शुद्ध तद्विष्णो परम पदम् ॥
अजं निरञ्जनं शान्तमव्यक्त ज्ञानमक्षरम् ।
अनादिनिधन ब्रह्म तद्विष्णो परम पदम् ॥" इति ।

अत्र प्रकृतिषु परिगणनात् प्रथमोपादानाच्च प्रधानतत्त्वमव्यक्ततया मन इत्युक्तम् । सङ्कल्पशब्देन तत्कारण मनो विवक्षितम् । ज्ञानं ज्ञातव्यम् । प्रत्यगात्मन पञ्चविंशकत्वेनोक्तत्वात् परिशेषाच्च चक्षुराद्यगम्यमात्मतत्त्वमव्यक्तशब्दोक्तम् । 'विकारा षोडश स्मृता ' इति षोडशविकारशब्दोपादानात् एता प्रकृतयस्त्वष्टौ' इत्युक्तत्वाच्चास्य स्मृतिवचनस्य, 'अष्टौ प्रकृतय षोडश विकारा ' इति श्रुतिमूलत्वमवगम्यते । अतस्तस्या श्रुतेरयमर्थ इति यमेन निर्णीयत इति स्फुटम् ।

ईदृशस्मृत्युपबृंहिततया अनया श्रुत्या विषयेन्द्रियाण्येव षोडश विकारत्वेन विवक्षितानीति भगवतो भाष्यकारस्य हृदयमिति भगवद्गीताभाष्ये स्पष्टमवगम्यते, "महाभूतान्यहकारो बुद्धिरव्यक्तमेव च' इति क्षेत्रारम्भकद्रव्याणि । पृथिव्यप्तेजोवाय्वाकाशानि महाभूतानि । अहङ्कारो भूतादि । बुद्धिर्महान् । अव्यक्त प्रकृति । 'इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचरा ' इति क्षेत्राश्रितानि तत्त्वानि । श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्था पञ्च कर्मेन्द्रियाणि

दश ; एकमिति मनः । इन्द्रियगोचराश्च पञ्च शब्दस्पर्शरूपरसगन्धाः" इति । अत्र क्षेत्रारम्भकद्रव्याणीत्यारम्भकद्रव्यपदेन, 'अष्टौ प्रकृतय' इति प्रकृतिशब्दो व्याख्यातः । 'क्षेत्राश्रितानि तत्त्वानि' इति विषयेन्द्रियाणां षोडशानां साधारणाकार उक्तः ।

एवम्, 'अष्टौ प्रकृतयः षोडश विकाराः' इति वाक्येऽपि

ननु संभवति द्रव्यपरतयैव, 'अष्टौ प्रकृतयः षोडश विकाराः' इत्यस्य निर्वाहे विकारपदेन गुणमात्रग्रहणं न युक्तम् । कथं निर्वाह इति चेत्—नात्र प्रकृतिशब्दः तत्त्वान्तरोपादानत्वमात्रेण प्रयुक्तः ; किंतु समष्टितत्त्वाभिप्रायेण । विकारपदञ्च व्यष्ट्यन्तर्गतवस्तुपरम् । एवं हि व्यष्टिप्रलयवर्णनानन्तरं समष्टिप्रलयवर्णनारम्भे भगवान् पराशर आह (६.४.३०.), 'एवं सप्त महाबुद्धे क्रमात् प्रकृतयः स्मृताः । प्रत्याहारे तु ताः सर्वाः प्रविशन्ति परस्परम्' इति । आवरणानि च न तन्मात्राणि, किन्तु भूतानीति तत्र (१. २.) एव सुबोधम् । अतः अण्डकटाहरूपपृथिवीसहिताः आवरणभूताः वाय्वादयः (वि-१२.) व्यष्टिप्रपञ्चहेतुत्वात् साक्षादुपभोगानर्हत्वात् समष्टयः प्रकृतयः । व्यष्ट्यन्तर्गतानि तु इन्द्रियाणि च भूतानि च विकाराः । भूतानामपि इन्द्रियविषयत्वेऽपि तत्तद्गुणविशिष्टतयैवेन्द्रियग्राह्यत्वात्, इन्द्रियव्यवस्थापकत्वरूपमहिमशालित्वाच्च गुणानाम्, तेषामेव प्राधान्येन विषयतया निर्देशः सर्वदर्शनसुप्रसिद्ध इति क्वचित् गुणपुरस्कारेण निर्देशेऽपि गुणिनामुपेक्षणे न तात्पर्यम् । एवञ्च, 'महाभूतान्यहङ्कारः' इति गीतादिकं सुस्थम् । 'एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु' इति शब्दादीनां (भारतादौ) निर्देशस्थलेऽपि महाभूतेष्विति द्रव्याणां विशेषणतया निर्देशात् द्रव्यविशिष्टगुणानामेव विकारत्वं गम्यते । गुणविशिष्टद्रव्यमिति द्रव्यवर्तिगुण इति च नात्यन्तभिन्नम् इत्या-

तत् संवत्सरमात्रमुषित्वा द्विधाऽकरोत्, अधस्ताद्भूमिमुपरिष्टाद्दा-

---

निषयेन्द्रियाण्येव श्रुत्यन्तराविरोधेन षोडशविकारत्वेन विवक्षितानीति व्यासादीनां परमर्षीणां भाष्यकारस्य च [हृदयं²] स्फुटतरमवगम्यते । अत· आकाशाद्वायुरित्यादीनां यथोक्त एवार्थः ।

एवं ब्रह्माण्डसृष्टिरुक्ता । अथ हिरण्यगर्भोत्पत्तिमाह **तत् संवत्सरमात्रमुषित्वा द्विधाऽकरोदिति** ॥ वक्ष्यमाण पुरुषः तस्मिन् अण्डे संवत्सरमात्रमुषित्वा परिणतं तदण्डं द्विधाऽकरोदित्यर्थः ।

शङ्कायाम्—निर्वाहप्रकारो यः कश्चिदस्तु । आकाशाद् वायुरित्यादेरर्थस्तु यथोक्त एव; न तत्रान्यथाभावः । अस्माभिस्तु गुणानामपि चतुर्विंशतितत्त्वमध्ये गणनं युक्तमिति एवमुक्तम् इत्याशयेन निगमयति अत आकाशादिति । एवं हि तत्त्वसागरसंहितावचनमपि श्रीरहस्यत्रयसारोद्धृतम्—'भूतानि च कवर्गेण चवर्गेणेन्द्रियाणि च । टवर्गेण तवर्गेण ज्ञानगन्धादयस्तथा' इति ज्ञानेन्द्रियैः सह गन्धादीनामेव चतुर्विंशतिमध्ये निवेशकम्, स्वारस्यात् । (व्याख्यातारस्तु गन्धतन्मात्रादि ग्राहयन्ति) । तथाच श्रीमुखसूक्तभाष्ये श्रीपटसहस्रिस्रायामपि (८. ८. ५.), "प्रकृतिमहदहङ्कारैकादशेन्द्रियपृथिव्यादिभूतशब्दादिविषयरूपचतुर्विंशतितत्त्वविलक्षण" इति । अत्र तत्त्वमुक्ताकलापश्लोकः (१. १५) तत्रसर्वार्थसिद्ध्यादिश्चानुसंधेयौ—

"तन्त्रेष्वाथर्वणेऽष्टौ प्रकृतय उदिताः षोडशान्ये विकाराः
निष्कर्षेऽस्मिन् परेऽस्मिन् वचसि तदितरत् सर्वमावर्जनीयम् ।
दृष्ट्वा सांख्यं पुराणादिकमपि बहुधा निर्वहन्त्येवमेके
चिन्तासाफल्यमान्द्यात् श्रमबहुलतयाऽप्यत्र नज्झैरुदासि ॥ इति ।

संवत्सरमात्रमिति मात्रशब्दः कात्स्न्यर्थकः । पूर्णं संवत्सरमित्यर्थः । अधस्तादिति । अत्र मोक्षधर्मे (३२६), 'ततो ब्रह्माणमसृजत्

काशम् । मध्ये पुरुषो दिव्यः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्र-पात् सहस्रबाहुरिति ।

आकाशमिति ॥ अकरोदित्यन्वयः । आकाशादि(?)शब्दः स्वर्गादि—परः । मध्ये अन्तरिक्षे पुरुषः । अभूदिति शेषः । पुरुषशब्दस्य मनुष्यपरत्वव्यावृत्त्यर्थं दिव्यः पुरुष इत्युक्तम् । तस्याण्डोत्पन्नस्य दिव्यपुरुषस्य पुरुषसूक्तप्रतिपाद्यपरमपुरुषात्मकत्वमाह सहस्रशीर्षा पुरुष इति । अन्यथा द्वितीयपुरुषशब्दस्य पौनरुक्त्यप्रसङ्गात् । सर्वज्ञत्वात् सर्वशक्तित्वाच्च सर्वत्र शिरश्चक्षुःपादकार्य[बाहुकार्य]करणसमर्थो यो महापुरुषः श्रुतः, तदात्मकोऽयमण्डोत्पन्नः पुरुष इत्यर्थः ।

इदञ्च सामानाधिकरण्यं परमपुरुषान्तर्यामिकत्वनिबन्धनम् ; न तु स्वरूपैक्यकृतम् । तस्य ब्रह्मा बिभीते' इति तस्य मृत्युभयाभिधानात्, 'भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम', 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एक ' इति पुण्डरीकाक्षस्य परमपुरुषस्य,

हैरण्याण्डसमुद्भवम् । सा मूर्तिः सर्वभूतानामित्येवमनुशुश्रुम । संवत्सरमुषित्वाऽण्डे निष्क्रम्य च महामुनिः। संदधेऽर्धं महीं कृत्स्नां दिवमर्धं प्रजापतिः । द्यावापृथिव्योरित्येष राजन् वेदेषु पठ्यते । तयोः शकलयोर्मध्यमाकाशमकरोत् प्रभुः' इति । मनुश्च (1-12) 'तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् । स्वयमेवात्मनो ध्यानात् तदण्डमकरोत् द्विधा । ताभ्यां स शकलाभ्याञ्च दिवं भूमिं च निर्ममे । मध्ये व्योम' इति ।

ननु 'दिव्यो देव एको नारायण' इति नारायणे दिव्यशब्दप्रयोग-स्यात्रोपनिषदि श्रवणात् वाक्यमिदं परमात्मपरमेवास्तु, कृतं चतुर्मुखविवक्षयेत्यत्राह अन्यथा द्वितीयपुरुषेति ।

सोऽग्रे भूतानां मृत्युमसृजत् त्र्यक्षं त्रिशिरस्कं त्रिपादं खण्डपरशुम् ।

मृत्योरपि भयनिमित्तत्वाच्च मृत्योर्भीतस्य मृत्युभयजनकस्य च स्वरूपैक्यानुपपत्ते । शाखान्तरे हिरण्यगर्भस्य, महापुरुषस्य महापुरुषत्वानभिज्ञत्वाम्नानाच्च न स्वरूपैक्यम् । 'स प्रजापतिरेक पुष्करपर्णे समभवत्' इत्यारभ्य, 'मम वै त्वङ्मांसा समभूत्' इति प्रजापतिनोक्ते, 'नेत्यब्रवीत् । पूर्वमेवाहमिहाऽऽसमिति । तत् पुरुषस्य पुरुषत्वम् । स सहस्रशीर्षा पुरुषः' इति चतुर्मुखस्य परमपुरुषावेदनं हि प्रतिपादितम् । अत एव ह्युक्तं ब्रह्मणैव,

'यत्र देवा न मुनयो न चाहं न च शङ्करः ।
जानन्ति परमेशस्य तद्विष्णोः परमं पदम् ॥' इति ॥

तथा तेनैव ब्रह्मरुद्रसंवादेऽप्युक्तम्—'तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिनाः । सर्वेषा साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित् ॥' इति । अतः तदन्तर्यामित्वनिबन्धनं सामानाधिकरण्यम् ।

इतिशब्दो भगवदेककर्तृकसर्गसमाप्तौ ।

अथ हिरण्यगर्भकर्तृकसर्गमाह सोऽग्रे भूतानां मृत्युमसृज-

नेत्यब्रवीदिति । पुष्करपर्णे जातेन प्रजापतिना स्वकीयमांसनखनालोत्पन्नवातरशन-वैखानस-वालखिल्यन्यायेन अपामन्तः कूर्मभूतं सर्पन्तमपि स्वत्वङ्मांसाभ्यां संभूतमभिमत्योक्ते, स कूर्मः तदुक्तं न्यषेधीदित्यर्थः ।

सहस्रशीर्षा पुरुष इत्यस्य तत्र 'भूत्वोदतिष्ठत्' (तै.आ.अ-१-२३.) इत्युत्तरत्रान्वयः । खण्डपरशुमिति । खण्डकपरशुविशिष्टमित्यर्थः स्यात् । रुद्रसृष्टिस्तु, 'ललाटात् क्रोधजो रुद्रो जायते' इत्युत्तरत्र वक्ष्यते।

सोऽग्रे इति । नन्वत्र पूर्वः प्रथमपुरुषशब्दः चतुर्मुखान्तर्यामिपरः,

दिव्य इत्यादि नारायणपरमित्यपि सुवचम्। तदयं तच्छन्दः परमपुरुषपर एव किं न स्यात्। तत्कर्तृकैव सृष्टिः चतुर्मुखस्येव मृत्युप्रभृतीनां सर्वाणि च भूतानीत्यन्तानामुच्यताम्। चतुर्मुखकर्तृकसृष्टिस्तु, हिरण्यज्योतिरित्यारभ्योपरि वक्ष्यमाणा परमस्तु। एवञ्च ब्राह्मणक्षत्रियादीनां भगवदवयवोत्पन्नत्वं सिद्ध्यति। प्रसिद्धं हि भगवतोऽवयवानामेव तथात्वम्, 'स्त्रीरत्नकारणमुपात्ततृतीयवर्णं दैत्येन्द्रवीरशयनं दयितोपधानम्। देवेश यौवनगजेन्द्रकराभिराममूरीकरोतु भवदूरुयुगं मनो मे', 'सर्गेष्विदं भवति चन्द्रमसां प्रसूतिः' इत्यादौ। यद्ययं स इति शब्दो ब्रह्मार्थकोऽभविष्यत्, तर्हि उपरि, तस्य ब्रह्मा बिभीते, सो ब्रह्माणमेव विवेश' इत्यत्रापि पूर्ववत्, 'तस्य स बिभीते, स तमेव विवेश' इति तच्छन्द एव प्रायोक्ष्यत। न च मनुवचनविरोध इति शङ्क्यम्—तत्र चतुर्मुखजन्यमनुजन्यत्वस्य प्रजापत्यादिषु कथनाद्यनेकवैलक्षण्यदर्शनेन स इत्यस्य चतुर्मुखार्थकत्वेऽपि विरोधपरिहाराभावात्। पुरुषसूक्तं तु कतमस्य पक्षस्य साधकमिति विमर्शपदं नातिक्रामति। महाप्रलयानन्तरभाविप्रथमसृष्टिप्रकरणत्वाच्चास्य सर्वस्य परब्रह्मजन्यत्ववर्णनपरत्वं युज्यते, यदिदं नामसहस्रभाष्येऽभाषिषत, 'यतः सर्वाणि भूतानि भवन्त्यादियुगागमे' इत्यत्र—"यद्यपि ब्रह्मसर्गादुपरि, अवान्तरसर्गे च ब्रह्मादिमुखेन सृजति, अथापि प्रथमसृष्टौ न तथेति सूचयति आदियुगागमे इति" इति। देवनायकपञ्चाशत्येव च स्त्रीरत्नमित्यादिवत् 'वेदेषु निर्जरपुते निखिलेष्वधीतं व्यासादिभिर्बहुमतं तव सूक्तमग्र्यम्। अङ्गान्यमूनि भवतः सुभगान्यधीते विश्वं विभो जनितयन्ति विरिञ्चिपूर्वम्' इत्यपि द्रष्टव्यम्। अतो ब्रह्मद्वितीयदिनादिरूपेषु कल्पेषु चतुर्मुखैकसृष्टत्वेऽपि सर्वेषाम्, आदौ परमपुरुषजन्यत्वं भूतानामुपपन्नमिति चेत्–अस्तु परमपुरुषकर्तृकाऽपि आदिसृष्टिरनेकेषां भूतानाम्—अथापि प्रकृतवाक्ये स इति स एव ग्राह्य इति न विशेषगम

तस्य ब्रह्मा बिभीते। सो ब्रह्माणमेव विवेश। स मानसान् सप्त पुत्रानसृजत्। ते ह विराज सप्त मानसान् असृजन्। ते ह प्रजापतय।

दिति। मृत्यु विशिनष्टि त्र्यक्षमित्यादिपदै। **तस्य ब्रह्मा बिभीते।** तस्येति सम्बन्धमात्रे षष्ठी। तस्मात् मृत्योर्भीत। स्रष्टुरपि भयावहो मृत्यु, किमुत अन्येषामित्यर्थ **सो ब्रह्माणमेव विवेशेति। सो** ब्रह्माणमिति सन्धिश्छान्दस। ब्रह्मशरीरे तिरोहित इत्यर्थ। **स मान** सानिति। **स:** ब्रह्मा सप्त **मानसानसृजत्।** मनसाऽसृजदित्यर्थ। **ते ह विराज** विविधदीप्तियोगात् विराट्छब्दवाच्यभूता सप्त मानस पुत्रा स्वयमपि मानसान् असृजन्। कथ मनसा सृष्टिरित्यत्राह **ते ह प्रजापतय** इति। प्रजापतित्वात् मनसा स्रष्टुं शक्ता हीत्यर्थ।

कमस्ति। प्रत्युत, सहस्रबाहुरिति इति इतिशब्देन भगवदेककर्तृक-सृष्टिसमाप्तिद्योतनात्, पूर्व मध्ये पुरुष इति ब्रह्मान्तर्यामितया गृही तस्य 'सोऽग्रे इति स इत्यनेन ग्रहणौचित्याच्च चतुर्मुखसृष्टत्वमेव मृत्युप्रभृतीनाम्। अत एव सोब्रह्माणमेव इति एवकारोऽपि सगच्छते। स्वस्य स्रष्टारमेव स्वय हन्त मृत्यु प्रविवेशेति वर्णनपरत्वात् तस्य। तदुपरि प्रजापतय सृज्यमाना अपि चतुर्मुखजन्यत्वेन प्रसिद्धा, न भगवत्पुत्रतया। द्वितीयखण्डे स्त्रीपुरुषरूपद्वैधकरणानन्तरसृष्टिस्तु साक्ष्यमाणा चतुर्मुखजन्यमनुसृष्टित्वेन सम्भावनमर्हति, बृहदारण्यकानुरोधात्। एवञ्च, ललाटात् क्रोधनो रुद्र ' इत्यत्र, 'अस्यैव चानुजो रुद्रो ललाटात् य समुत्थित इत्युपबृंहणानुसारमुपपन्न रुद्रे ब्रह्म-जन्यत्व प्रमाणान्तरानुसारेण ग्राह्यम्। महतो भूतस्य नि श्वसितमि त्यत्रापि मैत्रेयीविद्यायामिव साक्षात्परमात्मनि श्वसितरूप प्रतीतमपि इह तथा न ग्राह्यमित्यलम्।

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ।
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च हृदयात् सर्वमिदं जायते ॥
इति सुबालोपनिषदि प्रथमः खण्डः ॥

—o—o—

अथ द्वितीयः खण्डः ॥

अपानान्निषादा यक्षराक्षसगन्धर्वाश्च, अस्थिभ्यः पर्वता लोमभ्य

पुनश्च हिरण्यगर्भात् प्राणिसृष्टिमाह – ब्राह्मणोऽस्य मुखमासीदिति । ब्राह्मण मुखमासीदित्यौपचारिक सामानाधिकरण्यम् । मुखजात इत्यर्थ । पद्भ्यां शूद्र इत्यनन्तरोक्ते । बाहू राजन्यः कृतः । बाहुभ्यां कृतः तज्जनित इत्यर्थ । ऊरू तदस्य यद्वैश्यः । [यदिति] नपुंसकं वस्तुत्वाभिप्रायम् । वैश्य इति यत् तदस्य ब्रह्मणः ऊरू ऊरुभ्यां जातमित्यर्थ । प्राणः पञ्चवृत्तिप्राण । हृदयात् संकल्पादित्यर्थ । सर्वमिदम् = अनुक्तं सर्वमिदम् ।

इति श्रीहरितकुलतिलकवाग्विजयिसूनो
श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयस्य श्रीसुदर्शनार्यस्य
कृतौ सुबालोपनिषद्विवरणे प्रथम खण्ड ॥

—:**.—

अथानुक्तसर्गप्रपञ्चपूर्वकं प्रलय उच्यते अपानादिति । मनुष्येषु निकृष्टा, निषादा, देवयोन्यवान्तरभेदा यक्षराक्षसगन्धर्वाश्च चतुर्मुखस्यापानादजायन्तेति अध्याहारेण वा अजायतेति पदस्य विपरिणामेन

ओषधिवनस्पतयः, ललाटात् क्रोधजो रुद्रोऽजायत (जायते)।

तस्यैतस्य महतो भूतस्य निःश्वसितमेवैतत्, ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो निजि(चि?)तं ज्योतिषामयनं न्यायो मीमांसा धर्मशास्त्राणि व्याख्यानान्युपव्याख्यानानि च सर्वाणि च भूतानि।

हिरण्यज्योतिर्यस्मिन्नयमात्माऽधिक्षीयन्ति भुवनानि विश्वा,

वा अन्वय। ललाटात् क्रोधज इति। रुद्रोत्पत्तौ चतुर्मुखस्य मनो बुद्धिषु क्रोध, अवयवेषु ललाटश्च हेतु। 'मन्नग पुत्राय नम' इत्यादिष्वपि क्रोधात् ललाटोद्भवतया पुत्रत्वमेतदैकार्थ्येन सिद्धम्।

अथ शास्त्रप्रवर्तनमाह तस्यैतस्येति। तस्य अण्डसंभवस्य एतस्य देवादिसन्दुर्हिरण्यगर्भस्येत्यर्थ। महतो भूतस्येति परमात्मवाचिशब्देन सामानाधिकरण्यात् हिरण्यगर्भकर्तृकस्य सर्वस्य भगवदधीनत्व ज्ञाप्यते। 'महद्भूतमनन्तमपारम्', 'एतस्य वा अक्षरस्य महतो भूतस्य' इति, 'एको विष्णुर्महद्भूतम्' इति च श्रुतिस्मृतिषु महद्भूतशब्दो भगवति प्रसिद्धिरविगीता। निश्वसितमिति तत्र महत्त्वं विवक्षितम्। सर्वाणि च [तानीमानि] भूतानि निश्वसितमित्यन्वय। भूतशब्द शरीरपर।

हिरण्यज्योतिरित्यादि॥ हिरण्यमयानि ज्योतींषि यस्य स.

ननु हिरण्यज्योतिरित्यारभ्य वक्ष्यमाणा विश्वसृजप्रक्रिया खण्डे युक्ता। ततः पूर्वमुच्यमाना तु पूर्वखण्डे सत्यम्—यद्यपीयं परमपुरुषकर्तृकाऽपि पदाचित्, कदाचित्चतुर्मुखकर्तृकाऽपीत्यस्यप्रस्तुतत्वात्परम्।

आत्मानं द्विधाऽकरोत्, अर्धेन स्त्री अर्धेन पुरुषः। देवो भूत्वा देवान् असृजत्, ऋषिर्भूत्वा ऋषीन्, यक्षराक्षसगन्धर्वान्, ग्राम्यान् आरण्यान् पशून् असृजत्। इतरा गौरितरोऽनड्वान्; इतरा वडबेतरोऽश्वः; इतरा गर्दभीतरो गर्दभः; इतरा विश्वम्भरी इतरो विश्वम्भरः।
सोऽन्ते वैश्वानरो भूत्वा संदग्धे (स दग्धे?) सर्वाणि भूतानि।

हिरण्यज्योतिरित्यात्मविशेषणम्। यस्मिन् विश्वा भुवनानि अधि क्षीयन्ति = वश्यतया स्थितानि, सोऽयं हिरण्यज्योतिरात्मा = हिरण्यगर्भ आत्मानं द्विधाऽकरोदित्यन्वयः। कथं? अर्धांशेन स्त्री अर्धांशेन पुरुष। अभूदिति शेष। शरीरिणं स्रष्टुं ब्रह्मा स्वांशाभ्यां तत्तज्जातीय पुरुषोऽभूत्, तत्तज्जातीया स्त्री चाभूदित्यर्थ। तदेव प्रपञ्चयति देवो भूत्वा देवानसृजदित्यादिना। यक्षराक्षसगन्धर्वानिति। तज्जातीयः पुमान् भूत्वा असृजदिति प्रकरणवशादवगम्यते। ग्राम्यारण्यपशुसृष्टिं प्रपञ्चयति इतरा गौरित्यादिना। इतरा पूर्वं ब्रह्मणा स्वांशेन सृष्टा स्त्री गौरभवत्। इतरः तत्कल्पित पुरुषोऽनड्वान् पुङ्गवोऽभूत्। गोजातीयसृष्ट्यर्थमित्यर्थ। इतरा वडवा इतरोऽश्व इत्यादेरप्येवं योजना। वडवा तुरगली। विश्वम्भरी भारवहा उष्ट्री। अर्थान्तरमन्वेष्टव्यम्।

अथ प्रळयं प्रतिपादयति सोऽन्ते इत्यादिना। सः हिरण्यगर्भरूप परमपुरुष अन्ते स्थितिकालसमाप्तौ वैश्वानरः कालाग्निर्भूत्वा सर्वाणि भूतानि कार्यजातानि सदग्धे(?) दहति = धक्ष्यतीत्यर्थ। भवनदहनक्रियाभेदात् स इति द्विरुक्ति। दाहानन्तरं प्रळयमाह

कालाग्निरिति। श्रीविष्णुपुराणे द्रष्टव्यमिदम् (६-३)।

पृथिव्यप्सु प्रलीयते । आपस्तेजसि लीयन्ते । तेजो वायौ

पृथिव्यप्सु प्रलीयत इति । पूर्वावस्थाप्रहाणेन कारणसंसर्गो लयः । 'लीङ् श्लेषणे' इति हि धातुः । कार्यस्य तदुपयुक्तकारणद्रव्यांश उपादानम् । तदतिरिक्तांशस्त्वपादानम । तदपेक्षया कार्यस्य विभागव्यपदेशः । अतः पञ्चम्यन्तेन उच्यते । अपादान (उपादान !) त्यक्तकार्यावस्थद्रव्यमपादानेन संसृष्टं भवति । तस्य तदानीम्, घटस्य भूतलवत् अधिकरणत्वादपादानमेव सप्तम्यन्तेनोच्यते । अपादानस्योपादानद्रव्यसजातीयत्वात्, 'कारणे लय' इति व्यपदेशः । पृथिव्यप्सु प्रलीयते । पृथिवी पृथिवीत्वावस्थां तदुपक्रमभूतां गन्धतन्मात्रावस्थां हित्वा अम्व्यवस्था सती प्रागवस्थितेषु समुद्रादिजलेषु संसृष्टा भवतीत्यर्थः । स च संसर्गः समानाकारयोर्निरन्तरसंश्लेषरूपत्वादैक्यमित्युच्यते । शुक्लो (!) क्षीरे कपिलादिगो(!)क्षीरं संसृष्टमेकीभूतमिति व्यपदिश्यते । आपस्तेजसि लीयन्त इत्यादिवाक्यानामपि अयमेवार्थः । त्यक्तजलावस्थस्य त्यक्तरसतन्मात्रावस्थस्य च द्रव्यस्य तेजोवस्थापन्नस्य प्रागवस्थिततेजस्संपर्को लयः । एवमुत्तरत्राप्यनुसन्धेयम् ।

एतत् सर्वं भगवता पराशरेण स्पष्टमुक्तम्—

'आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम् ।

एतत् सर्वमिति । विवेचितस्य पदार्थाभिप्रायकोऽर्थः, तत्र तत्त्वतारतम्यश्चेत्यर्थः । आपो ग्रसन्तीति श्लोकः पृथिव्याः गुणग्रासवर्णनेन गन्धाः प्रकर्षानुरूपं दर्शयति । श्लोके विशेषमानस्य तादात्म्य-अपृथक्सिद्धि-सामानाधिकरण्यादिरूपमेव [illegible]

आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते ।
प्रनष्टे गन्धतन्मात्रे भवत्युर्वी जलात्मिका ।
आपस्तदा प्रवृद्धास्तु वेगवत्यो महास्वनाः ।
सर्वमापूरयन्तीदं तिष्ठन्ति विचरन्ति च' इति । तथा,
'नश्यन्त्यापः पुनस्ताश्च रसतन्मात्रसंक्षयात् ।
ततश्चापो हृतरसाः ज्योतिष्ट्वं प्राप्नुवन्ति वै ।
अग्न्यवस्थे तु सलिले तेजसा सर्वतो वृते ।
स चाग्निः सर्वतो व्याप्य आदत्ते तज्जलं तथा ।
प्रनष्टे रूपतन्मात्रे हृतरूपो विभावसुः ।
प्रशाम्यति तथा ज्योतिर्वायुर्दोधूयते महान् ।
निरालोके तदा लोके वाय्ववस्थे च तेजसि' इत्यादिना ॥

अत्र, 'प्रनष्टे गन्धतन्मात्रे भवत्युर्वी जलात्मिका' इत्यनेन स्थूलपृथिव्या एव गन्धतन्मात्रावस्थापहाणेन जलत्वापत्तिरुक्ता । 'आपस्तदा प्रवृद्धास्तु' इत्यनेन प्रागवस्थितानामपां पृथिव्यवस्थान्तररूपसलिलान्तरसंसर्गात् तदेकीभूततया प्रवृद्धत्वमुक्तम् । 'सर्वमापूरयन्ति' इति पूर्वपृथिव्याक्रान्तप्रदेशस्यापि सकलिलस्याऽऽपूरितत्वमुक्तम् । एवमग्न्यवस्-

दर्शनात् गन्धस्य च सारगुणत्वात् तथोक्तिः । ... इत्यादिना च पृथिव्याः गन्धतन्मात्रलयद्वारा वारिभावो वर्णितः। यद्वा आपो प्रमन्तीति पूर्वार्धं गन्धतन्मात्रस्य स्वस्मिन् विलापने अपां प्रवृत्तिं दर्शयति। उत्तरार्धश्च अत एव पृथिव्याः गन्धतन्मात्रद्वारा जले विलयपरम्।

सकलिलस्येति । कलिलपदेन [illegible] ।

लीयते । वायुराकाशे लीयते । आकाशमिन्द्रियेषु

जलस्यापि रसतन्मात्रावस्थाप्रहाणेन ज्योतिष्ट्वापत्ति कण्ठोक्ता—'अग्न्य वस्थे तु सलिले तेजसा सर्वतो वृते' इति । [अग्न्यवस्थे सलिले ?] औष्ण्यरूपगुणेनाऽऽवृते सति प्रागवस्थितो वह्नि सर्वतो व्याप्य = पूर्व जलसंसृष्टमपि प्रदेश व्याप्य तज्जलमग्न्यवस्थमादत्ते = स्वात्मनैकीकरोती त्यर्थ । 'प्रनष्टे रूपतन्मात्रे' इत्यादिना अग्नेरपि तन्मात्रावस्थाप्रहाणेन वायुत्वापत्ति, तेनैकीभावात् प्रागवस्थितस्य वायोरतिमहत्त्वा-पत्तिश्च प्रतिपादिता । एवमुपबृहणानुगृहीतत्वात् पृथिव्यप्सु प्रलीयत इत्यादिवाक्याना यथोक्त एवार्थ ।

आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेष्विति । अत्र इन्द्रि-याणि तन्मात्राणि च न लयस्थानत्वेन विवक्षितानि । इन्द्रियाणा माकाशकारणत्वाभावात्, तन्मात्राणामिन्द्रियकारणत्वाभावात् । प्रलीयत इति पदाश्रवणाच्च । अत एव लयशब्दानुषङ्गश्च न युक्त । इतर-सर्ववाक्येष्वनुषङ्गश्चेत्, मध्यगतवाक्यद्वयेऽपि अनुषङ्ग स्यात् । पूर्वा परवाक्येषु सर्वेषु लयवाचिपदस्य पठितत्वात् मध्येऽनुषङ्गश्चानुचित । अतो लयपदाश्रवण लयस्याविवक्षितत्व दर्शयति । अत ससर्गमात्रमेव विवक्षितम् । नन्वाकाशस्येन्द्रियसयोग प्रागप्यस्तीति प्रळयदशाया तद्विवक्षणमयुक्तमिति चेत्—[न] इह विवक्षितस्य ससर्गस्य प्रागसिद्ध-त्वात् । मनआदीनामिन्द्रियाणा हि पृथिव्यादिमूर्तेराप्यायन श्रुतिस्मृतिषु प्रसिद्धम्, 'अन्नमय हि सोम्य मन आपोमय प्राणस्तेजोमयी वाक्', 'श्रोत्र नभो घ्राणमुक्त पृथिव्या' इत्यारभ्य, 'वाय्वात्मक स्पर्शनमा-

इन्द्रियाणि तन्मात्रेषु । तन्मात्राणि भूतादौ लीयन्ते ।

मनन्ति, 'नभ श्रोत्रञ्च तन्मयम्' इमित्यादिषु । तत्र पृथिव्यादिषु वायु पर्यन्तेषु प्रलीनेषु तत्तदिन्द्रियाप्यायकभूतांशानामपि प्रलीनतया तेषामाकाशतापन्नत्वात् सर्वेष्वपीन्द्रियेषु स्वान्तर्गतेतरभूतमाकाशमेव संसर्गितयाऽवस्थितम्, न तु पृथिव्यादीत्यर्थः । अथ इन्द्रियाणामाकाशस्य च अहङ्कारकार्यत्वात् सेन्द्रियस्य स्वान्तर्गतेतरभूतचतुष्टयस्याकाशस्य तत्र लयं वक्तुम्, आकाशस्य तन्मात्रावस्थापन्नस्यैवेन्द्रियसंसर्गमाह—**इन्द्रियाणि तन्मात्रेष्विति** । पूर्वमाकाशसंसृष्टानीन्द्रियाणि पश्चात् शब्दतन्मात्रेषु संसृष्टानीत्यर्थः । परित्यक्ततन्मात्रावस्थतया पृथिव्यादिषु प्रलीनेषु गन्धतन्मात्रादीनामवस्थानानुपपत्तेः शब्दतन्मात्रमेव **तन्मात्र**शब्देन विवक्षितम् । तत्तदिन्द्रियाप्यायकपृथिव्यादिभूतांशानामपि स्वस्वकारणतत्त्वलयक्रमेण शब्दतन्मात्रतापन्नत्वात् तत्तदंशेन भेदविवक्षाया बहुवचनम् । एतदुक्तं भवति–इन्द्रियाप्यायकभूतानां सर्वेषां आकाशतापन्नत्वात् आकाशस्यैवेन्द्रियेषु संसर्ग आसीत् । पञ्चानामपि भूतानां शब्दतन्मात्रतापन्नत्वात् इन्द्रियाणि शब्दतन्मात्रांशभेदेषु संसृष्टान्यासन्निति ।

अथ सेन्द्रियाणां शब्दतन्मात्रांशानां स्वकारणे प्रलयमाह **तन्मात्राणि भूतादौ लीयन्ते** इति । **भूता**दिशब्दोऽहङ्कारमात्रपरः । इन्द्रि

अहङ्कारमात्रपर. इति । कृत्स्नाहङ्कारपरः, न तु महाभूतकारणतामसाहङ्कारमात्रपरः इत्यर्थः । तन्मात्राणीति निर्देशानुसारेण भूतादौ इति निर्देशः कृतः । अत्र तन्मात्रपदस्य पूर्ववाक्यानुसारेण

याणां सात्त्विकाहंकारकार्यतया तस्मिन्नंशे लयोपपत्ते । तामसाहंकारांशे लयानुपपत्तेश्च ।

यद्वा — अण्डान्तर्गतस्य भूतचतुष्टयस्य स्वस्वतन्मात्रलयक्रमेणाऽऽकाशतापत्तिराकाशस्येन्द्रियसंसर्गश्चोक्तौ । अथ तेनाकाशेन सह अण्डात् बहिरावरणत्वेनावस्थितानां भूतानां तन्मात्रावस्थापत्तिरूपं प्रलयमिन्द्रियसंसर्गञ्चाह **इन्द्रियाणि तन्मात्रेष्विति** ॥ ब्रह्माण्डतदावरणरूपेणावस्थितानि पृथिव्यादीनि भूतानि स्वस्वकारणे प्रलीयमानानि तन्मात्रावस्थाक्रमेणापन्नानि भवन्ति । तेषु तन्मात्रेष्विन्द्रियवर्गः क्रमेण संसृष्ट इत्यर्थः । अथाण्डोदरतद्बहिर्भागावस्थितमहाभूतकारणानां साधारणं प्रलयमाह **तन्मात्राणि भूतादौ लीयन्त** इति । तानि तन्मात्राणि साक्षात् परम्परया च स्वकारणभूतेऽहङ्कारे साक्षात् परम्परया च लीयन्त इत्यर्थः ।

सेन्द्रियतन्मात्रपरत्वे सिद्धे भूतादिपदमपि सात्त्विकाहङ्कारविशिष्टभूतादिपरं सुग्रहम्, ग्राह्यञ्चेति भावः ।

तन्मात्रेषु, तन्मात्राणीति बहुवचनोपपत्तिसंपादकं पक्षान्तरमाह यद्वेति । पूर्वोक्ते पक्षे, पृथिव्यप्सु प्रलीयत इत्यादिवाक्यानामविशेषेण ब्रह्माण्डान्तर्वर्तितदावरणोभयरूपमहाभूतविलयपरत्वं सुवचम् । अस्मिंस्तु पक्षे अन्तर्वर्तिभूतमात्रलयपरत्वम् । अन्यथा बहिर्वर्तिपृथिव्यादिलयस्यापि विवक्षितत्वे जलादिलयात् प्रागेव गन्धतन्मात्रादिलयस्यापि निष्पन्नतया आवरणभूताकाशमात्रस्य परिशिष्टतया तस्य, 'आकाशमिन्द्रियेषु' इति इन्द्रियसंसर्गे कथ्यमाने तत्र आकाशकारणभूतं शब्दतन्मात्रमेव स्थितमिति, 'इन्द्रियाणि तन्मात्रेषु' इति बहुवचनानुपपत्तिर्हि तदवस्था स्यात् । एवञ्चाण्डा-

अयमर्थो भगवता **पराशरेण** स्पष्टमुक्तः, 'आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम्' इत्यादिना अण्डान्तर्गतानां तत्त्वानामव्यक्तपर्यन्तं प्रलयमुक्त्वा, 'येनेदमावृतं पूर्वमण्डमप्सु प्रलीयते ।

सप्तद्वीपसमुद्रान्तं सप्तलोकं सपर्वतम् ॥

उदकावरणं यत्तु ज्योतिषा लीयते तु तत् ।
ज्योतिर्वायौ लयं याति यात्याकाशे समीरणः ॥

आकाशश्चैव भूतादिर्ग्रसते त तथा महान् ।
महान्तमेभिः सहितं प्रकृतिर्ग्रसते द्विज ॥' इति ।

अस्या योजनाया तन्मात्रेषु, तन्मात्राणीत्युभयत्र तन्मात्रशब्दासंकोच , बहुवचनस्वारस्यम् ; उपबृंहणानुमहश्च सिध्यति ।

न्तर्वर्तिषु भूतेषु आकाशमात्रपरिशेषः प्रथममुक्तः । अथ तस्येन्द्रियेषु संसर्गः । अथ चाण्डकटाहरूपपृथिव्याः तदावरणपरम्परान्तर्गतानां जलादीनाञ्च लये जायमाने तत्तद्भूतलयाधारतत्तत्तन्मात्रसंबन्धः क्रमेण भवतीति इन्द्रियाणि तन्मात्रेषु इति बहुवचनोपपत्तिरस्मिन् पक्षे इति भावः । सोन्ते वैश्वानर इति पूर्ववाक्यञ्च व्यष्टिमात्रविषयकमिति ।

ननु अण्डान्तर्वर्तिपृथिव्यादिलयानन्तरमाकाशस्येन्द्रियसंसर्गः आकाशमिन्द्रियेषु इत्यनेनोक्तः । तदनन्तरमिन्द्रियसंसर्गः तन्मात्रेष्विति, इन्द्रियाणि तन्मात्रेष्वित्यनेन वक्तव्यम । नेतद् सुवचम् । आकाशपरिशेषणात् प्रागेव गन्धतन्मात्रादीना नष्टतया आकाशसंसर्गानन्तरमिन्द्रियाणां सर्वतन्मात्रेषु संसर्गकथनायोगादित्यत्राह अव्यक्तपर्यन्तं प्रलयमुक्त्वेति । अण्डान्तर्वर्तिनामव्यक्तपर्यन्तं प्रलयः पूर्वं भवति । तदनन्तरमेवाऽऽवरणभूतानां लय इति विष्णुपुराणप्रा-

भाष्याङ्गीकर्तव्यम् । अत इन्द्रियाणां तन्मात्रेषु क्रमेण आवरणान्तर्गतेषु सर्वेषु संसर्गोपपत्तिरिति ।

नन्विदमिह विमृश्यम्—विष्णुपुराणे अण्डान्त अव्यक्तपर्यन्तलयं पूर्वमुपवर्ण्य पश्चाद् बाह्यपदार्थलयवर्णनेऽपि लयवर्णनपौर्वापर्यस्येह लयपौर्वापर्यकल्पकत्वे मानाभाव । न हि अण्डान्तर्वर्तिकारणभूतमहदहङ्कारापेक्षया बाह्यानां तेषां पृथगव्यक्तादुत्पद्यमानत्वमस्ति । एक एव हि महान् एक एव च सात्त्विकादिरहङ्कारः । अतो बाह्यपृथिव्यादिलयात् प्रागेव अण्डान्तर्वर्तिलयकाल एवाव्यक्तपर्यन्तस्यैव लयस्य कल्पनं न युक्तम् । किञ्च तथा कल्पने अण्डान्तर्वर्त्याकाशसंसृष्टानामिन्द्रियाणामाकाशेन सह भूतादौ लयस्तदैव स्यात् , बहिर्वर्तिमात्रस्य तु पश्चादिति वर्णनस्यैव युक्तत्वात् तेषामिन्द्रियाणां बाह्यतन्मात्रेषु संसर्गकल्पनं तत एव भूतादिलयवर्णनञ्चेह श्रुतं नोपपद्येत । अत अण्डान्तर्वर्तिपृथिवीलयकाल एव बहिः पृथिवीलयोऽपि । एवं तत्तद्भूतलयोऽप्युभयत्र युगपदेव । तथा चाकाशस्येन्द्रियेषु संसर्गकाले बहिरप्याकाशमात्रमेवावस्थितमिति तदनन्तरं तन्मात्रे इन्द्रियसंसर्गः शब्दतन्मात्र एव भवितुमर्हति । अनन्तरमेव तु सहृत् अहङ्कारस्य, ततो महतश्च लयो यथाश्रुति । न च 'इन्द्रियाणि तन्मात्रेषु' इत्यनेन आकाशेन्द्रियसंसर्गात् पूर्वं गन्धतन्मात्रादिभिरिन्द्रियसंसर्ग , पश्चात् शब्दतन्मात्रेण च सोऽभिधीयत इत्येवास्त्विति वाच्यम्—तथा सति पूर्वोक्ते पक्षेऽपि तन्मात्राणीति बहुवचनसमर्थनस्य तुल्यतया तत्र तत्त्यागायोगात् । अत आकाशेन्द्रियसंसर्गानन्तरं सर्वतन्मात्रसंसर्गं इन्द्रियाणां वर्णयेत् , अन्य एव पन्था आश्रयणीय ।

कोऽसाविति चेत्—उच्यते । अहङ्कारात् शब्दतन्मात्रमात्रे जाते तदुत्पन्नादाकाशात् एकैकतन्मात्रैकैकभूतक्रमेण सृष्टि सिद्धान्तसंमता । विष्णुपुराणव्याख्याने विष्णुचित्तीये सा नाद्रियते (१ २)।

तथासति, 'अष्टौ प्रकृतयः षोडश विकाराः' इति प्रकृत्यष्टकादिपरिगणनं न घटत इति। अतः शब्दतन्मात्रादेव आकाशवत् स्पर्शतन्मात्रेऽप्युत्पन्ने तस्मात् शब्दतन्मात्रसहितादेव वायूत्पत्तिः एवमुत्तरोत्तरभूतम् अनन्तरपूर्वात् तन्मात्रात् स्वपूर्वतन्मात्रसहितादुत्पद्यत इति तन्मात्राणामेव प्रकृतित्वात्, 'अष्टौ प्रकृतय' इत्युपपन्नम्। न च स्पर्शतन्मात्रमात्रात् वायूत्पत्तौ तत्र शब्दगुणोपलम्भ उपपद्यते। तन्मात्रं हि नाम, 'वायुर्गन्धानिवाशयात्' इत्युक्तरीत्या वातानीतसुरभिभागवत् तत्तद्गुणमात्रे उद्भूतः अन्यांशे च धर्मितद्गतगुणान्तरादावनुद्भूतः (अनुत्कटः) सूक्ष्मद्रव्यविशेषः। तत् कथं तदेकोत्पन्नस्य स्थूलानेकगुणशालित्वमिति। परंत्विदं विष्णुचित्तीयदृष्टमपि अत्र व्यासार्योपनिषद्भाष्ये, 'अष्टौ प्रकृतयः' इत्यस्यान्यथा तात्पर्यवर्णनेन सांख्यमतनिराकरणादेव नाभ्युपगतमिति सुग्रहम्। तत्र विष्णुचित्तीयमते, प्रकृत्यष्टकादिविवरणपराणां व्यासवचसामन्यथा निर्वाहसंभावनायामपि, 'आकाशाद्वायुः', 'पृथिव्यप्सु प्रलीयते' इत्यादिश्रुतिवाक्यार्थवैघट्यं पूर्वमेतद्भाष्यदर्शितरीत्या जागर्तीति तन्मतं यद्युपेक्ष्यते, तर्हि एतद्भाष्योक्तमप्युपेक्ष्य अहङ्कारादेव तन्मात्राणि पञ्च जायन्ते। ततः शब्दतन्मात्रादाकाशे जाते, आकाशात् स्पर्शतन्मात्रसहिताद् वायुरुत्पद्यत इत्येवमेकभूतैकतन्मात्रयोरुत्तरोत्तरभूतोपादानत्वमिष्यताम्। एवञ्चोक्तश्रुतिवैघट्यविघटनम्, तन्मात्राणि भूतादौ लीयन्ते इति बहुवचनाञ्जस्यञ्चेति चेत्—न—

सर्वेषां तन्मात्राणामहङ्कारजन्यत्वस्य विष्णुपुराणाद्युपबृंहणविरोधनिरुद्धत्वात्। बहुवचनस्य पाशन्यायेनोपपन्नतया तदनुरोधेन विस्पष्टोपबृंहणबाधायोगात्। अतः स्मृतिपाञ्चरात्रानुरोधात् सिद्धान्तसंमतरीतिरेव सृष्टिक्रमः। सर्वमन्यत् तदनुरोधेन नेयमित्यलम्।

ननु आकाशमिन्द्रियेषु न लीयत इति कथम्? चतुर्दशखण्डे (१४)पृथिवीवायावाकमापोऽव्यादाः इत्येवमुत्तरोत्तरं प्रलयस्थलनिर्देशात्

भूतादिर्महति लीयते । महानव्यक्ते लीयते । अव्यक्तमक्षरे लीयते ।

भूतादिर्महति लीयते इत्यत्रापि **भूतादि**शब्दोऽहंकारमात्रपरः । वैकारिकतैजसाहंकारयोः तदानीमवस्थानानुपपत्ते. । **महानव्यक्ते लीयत** इति । गुणत्रयवैषम्यानन्तरपूर्वावस्था गुणसाम्यम् । गुणसाम्यलक्षणमव्यक्तम् । **अव्यक्तमक्षरे लीयते** इति । यस्यामवस्थायां गुणसाम्यमप्यस्फुटम्, तदवस्थं चेतनसमष्टिगर्भं तत् अक्षरशब्देनोच्यते ; न तु चेतनमात्रम् । तस्याव्यक्तप्रकृतित्व-तमोविकृतित्वायोगात् ।

आकाशो वा अन्नमिन्द्रियाण्यन्नादानीति तत्र तल्लयश्रवणादिति चेन्न– तत्र इन्द्रियाणीत्यस्य इन्द्रियसंसृष्टतन्मात्रपरत्वात् । ननु, 'आकाशं तन्मात्रे लीयते, तन्मात्रं भूतादौ' इत्येवं निर्देष्टव्ये, मध्ये इन्द्रियघटनं किमर्थं कृतमिति चेत्—उच्यते । स्थूलभूतानामेवेन्द्रियग्राह्यता ; न तन्मात्राणाम् । सृष्ट्यारम्भे च सात्त्विकाहङ्कारजनितानि इन्द्रियाणि विषयोपादानभूते तन्मात्रे संसर्जितानि क्रमेणाकाशादिषु संसृष्टानि स्थितानि समये तत्तद्ग्राहकाण्यभूवन् । एवञ्च, 'ग्राह्यो विषयः सर्वो विलीनप्रायः, ग्राहकमात्रमवशिष्टम् ; इन्द्रियाप्यायकभूतांशश्च तदा आकाशरूपेणैव स्थित इति आकाशमिन्द्रियेष्विति वाक्ये ज्ञाप्यते । अथ, 'ग्राहकमपि तन्मात्रेण सह अहङ्कारे विलयार्थं तन्मात्रे संसृज्यते, सर्वथा आप्यायकभूतांशविहीनमेवास्ति' इति इन्द्रियाणि तन्मात्रेष्वित्यादिना दर्श्यते । 'इन्द्रियेभ्यः परा ह्यर्थाः' इति न्यायेन विषयाणां प्राधान्यात्, भूरिप्रपञ्चन्याय विषयहेतोर्भूतादेस्तामसस्य शब्दो निर्देशः, न सात्त्विकस्येति च ध्येयम् ।

अवस्थानानुपपत्तेरिति । सह लयस्यावश्यकत्वादिति भावः । चेतनसमष्टिगर्भमिति । अक्षरस्य चेतनस्य अचिद्गर्भतया तस्यामवस्थायामक्षरांशोद्भवात् प्रकाशत इति तत् अक्षरसंज्ञां लभते ।

अक्षरं तमसि लीयते । तमः परे देव एकीभवति ।

अत्र सर्वं तत्त्वजातं चिदचिदात्मकं मन्तव्यम् ; 'प्रधानाद्विशेषान्तं चेतनाचेतनात्मकम्' इति भगवत्पराशरवचनात् । अत्र तु चिद्गर्भवस्तुनि अक्षरशब्द उपचरितः ; प्रयोगेऽन्यथासिद्धे शक्त्यन्तरकल्पनायोगात् । अक्षर तमसि लीयते इति । चिद्गर्भत्वमचित्त्वमपि यत्र विवेक्तुमशक्यम्, तदवस्थमतिसूक्ष्मं प्रधानं तमश्शब्दाभिलप्यम् । अक्षराद्यवस्थाप्राप्त्यौन्मुख्यविशिष्टं तदेव विभक्तं तमः । तदौन्मुख्यरहितमविभक्तं तमः परमात्मशरीरतयाऽपि चिन्नयितुमशक्यम्, सलिलविलीनलवणचन्द्रकान्तस्थसलिल--सूर्यकान्तस्थवह्निकल्पं सर्वज्ञपरमात्मैकवेद्यमवतिष्ठते । भूतलविनिहितबीजस्थानीयमविभक्तं तमः । मृत्सिंसृतबीजवत् विभक्तं तम । सलिलसंसृष्टार्द्रशिथिलावयवबीजतुल्यमक्षरम् । उच्छूनबीजसमानमव्यक्तम् । अङ्कुरस्थानीयो महानिति विवेक । **तम...एकी भवति ।** महदाद्यवस्थामहाणवत् तमस्त्वप्रहाणाभावात् लीयत इत्यनुक्ति. । कार्योपयोगितया विभक्तं तम कार्यानुपयुक्ताविभक्ततमसि एकीभवतीत्यर्थः । यथा सलिलावस्थपृथिव्यंशः प्रागवस्थितसलिलेनैकीभवति, यथाऽग्न्यवस्थो जलांश प्रागवस्थिततेजसैकीभवति, तद्वत् तमस्तत्त्वस्य परमात्मशरीरभावस्य वक्ष्यमाणत्वादविभक्ततमश्शरीरकपरमात्मनैकीभाव इति तत्त्वस्थिति ।

तमः परे देव एकीभवतीति । अत्र परे इत्यनेन तस्य सर्वोपादानत्वम्, देवे इत्यनेन निमित्तत्वञ्च व्यज्यते । दिवु क्रीडायामिति लीलारसानुभववचनात् किमर्थं सृजतीति शङ्काऽपि शमिता । ननु 'कारंकारमलौकिकाद्भुतमयं मायावशात् संहरन् हारंहारमपीन्द्र-

परस्तात् तमसस्तमसदसत्—इत्येतद्विवृणोति तु-

चिदचिदात्मककृत्स्नप्रपञ्चप्रकृतिभूततमोविलक्षणं तत्त्वान्तरं प्रतिपादयति परस्तात्तमसस्तमसदसदिति । परशब्दः ऊर्ध्वदेशपरः । 'अथ हैषोऽनन्तमपारमक्षय्यं लोकं जयति । यः परेणाऽऽदित्यम्' इत्यादिप्रयोगात् । 'दिग्देशकालेष्वस्तातिः' इति पाणिनिस्मृतिः । तमस ऊर्ध्वदेशो इत्यर्थः । सदसच्छब्दौ कार्यावस्थचेतनाचेतनपरौ । सदादिशब्दाश्च न निषेधमात्रपराः । अपितु तद्विलक्षणपराः इति पूर्वमेवोपपादितम् । तमस उपरिभागे कार्यकारण (कार्यावस्थ ?) चिदचिदात्मकोभयात्मकजगद्विलक्षणं तत्त्वमित्यर्थः । न च वाच्यम् - सदसदनिर्वचनीयमुच्यत इति । परस्तादिति पदवैयर्थ्यात् । परमते हि तमःपर्यायं इदमेव यदज्ञानमनिर्वचनीयम् । परशब्दस्य तमोविलक्षणत्व-

---

जालमिव यः कुर्वन् जगत् क्रीडति, तं देवं' इत्यत्र मुख्यसाम्राज्यनिर्वहणधुरन्धरं पश्येम, जगद्व्यापारस्य सर्वस्यैव क्रीडामात्रायमाणत्वादित्यत्र ननु स्थलं प्रदर्श्यते परस्तात्तमसस्तमसदसदिति । तत्र स्थितस्य न कर्मोपाधिकचेतनशरीरान्तर्यामित्वदशाऽस्तीति, ज्ञानानन्दमयस्वरूपस्य मोक्षविग्रहसेनयित्यस्तमस्तैश्वर्यस्य विचित्रानन्तभोग्यभोगोपकरणविस्तारस्य श्रीमतो नारायणस्य परमो भोग इति ।

देश इति । न च परभागानन्तरमिति कालपरत्वमेव किं न स्यादिति वाच्यम्—पञ्चदशखण्डे एतत्समानाकारवाक्ये देशार्थकत्वावश्यायादिहापि तद्विधिः । चेतनाचेतनेति । अत्र, "केवलाच्चेतनादचेतनात् मिश्रात्तदुभयरूपपदार्थेभ्यश्च विलक्षणतया" इति सर्वव्याख्यानाधिकरणश्रुतप्रकाशिकाऽप्यनुसंधेया ।

शासनम्। इति वेदानुशासनम्। वेदानुशासनम्॥ इति द्वितीयः खण्डः

परत्वे प्रपञ्चस्य निर्वचनीयत्वे ब्रह्मण एवानिर्वचनीयत्वञ्चोक्तं स्यात्। अस्तातिप्रत्ययवैयर्थ्यञ्च भवेत्। अतः प्रकृतिप्राकृतसमस्तवस्तुविलक्षणं किमपि तत्त्वं विवक्षितम्। तच्च किमित्यपेक्षायाम्, 'आदित्यवर्णं तमसः परस्तात्', 'तदक्षरे परमे व्योमन्', 'विश्वं पुराणं तमसः परस्तात्' इत्यादिभिः वेदान्तवाक्यैः मुक्तप्राप्यस्थानविशेषविशिष्टं परं ब्रह्मेति निश्चीयते। न च केवलं परं ब्रह्मैव विश्वविलक्षणत्वात् नसन्नासन्नसद्-सदित्युच्यते; परस्ताच्छब्दानन्वयप्रसङ्गात्। त्रिविधपरिच्छेदरहितया सर्वगतस्य परब्रह्मण स्वरूपं हि देशविशेषपरिच्छिन्नं कथमुच्यते। अतः स्थानविशेषरूपविशेषविशिष्टमेव तथा वक्तुं युक्तम् (क्रमिनि ?) परस्य ब्रह्मणो रूपमनेन वाक्येन प्रतिपाद्यत इति सिद्धम्।

इत्येतन्निर्वाणमनुशासनम्। एतदनुशासनम् विविच्य ज्ञापनम् = उपदेश. **निर्वाणं** निर्वाणहेतुः = मोक्षहेतुः; तत्कारण-विषयत्वादित्यर्थः। **इति वेदानुशासनमिति।** 'जगत्सृष्टिरेवं विधा। प्रलय एवंविधः। कार्यकारणभूतानि तान्येतानि। ब्रह्मादयश्च कार्य-भूताः। परमकारणं ब्रह्मैव चिदचिद्वस्तुविलक्षणं विलक्षणदेशादि-विशिष्टम्। तच्च परमपुरुषः। ब्रह्मादयश्च तत्कार्यभूता. तदात्मकाः। परमकारणविषयज्ञानमेव मोक्षहेतुः' इत्ययं वेदोपदेश इत्यर्थः। कारण-तत्त्वोपदेशसमाप्तिद्योतकोऽभ्यास॥

इति श्रीहरितकुलतिलकवाग्विजयिसूनोः श्रीरङ्गराजदिव्याज्ञालब्ध-
वेदव्यासापरनामधेयस्य श्रीसुदर्शनार्यस्य कृतौ
सुबालोपनिषद्विवरणे द्वितीयः खण्डः॥

अथ तृतीयः खण्डः ।

असद्वा इदमग्र आसीत् ।

अजातमभूतमप्रतिष्ठितमशब्दमस्पर्शमरूपमरसमगन्धमव्ययं

जगत्कारणतयोक्तस्य परब्रह्मणः कारणत्वशङ्कितविकारादिदोषव्युदासार्थं तत्स्वरूपं विशोध्यते तृतीयखण्डेन । तदर्थं कारणमनुवदति असद्वा इदमग्र आसीदिति । इदंशब्दो न जगन्मात्रपरः । तस्य वक्ष्यमाणजगद्वैलक्षण्यकथाघातात् । न हि जगत् जगतो विलक्षणाकारं भवति । जगतः परमात्मशरीरत्वश्चात्रैव वक्ष्यते । अत इदंशब्देन जगच्छरीरकं ब्रह्मोच्यते । जगद्रूपं परं ब्रह्म तु अग्रे सृष्टेः पूर्वमसदासीत् अविभक्तनामरूपमासीत् । महदहङ्कारदेवमनुष्यादिनामरूपशून्यमासीदित्यर्थः । आत्मानं मन्येत्यनन्तरमात्मशब्दव्यपदेशेन असच्छब्दस्यात्मविषयत्वावगमात् ; 'सदेव सोम्येदमग्र आसीत्' इति कारणवाक्यान्तरैकार्थ्येन तुच्छत्वायोगाच्च । सच्छब्दः कार्यपरः । 'असद्वा इदमग्र आसीत् । ततो वै सदजायत' इति शाखान्तरे श्रवणात् । कार्यं तु विभक्तनामरूपम् । 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' इति श्रवणात् । सद्विलक्षणत्वञ्चासत्त्वम् । अतो नामरूपशून्यमासीदित्यर्थः ।

तस्य समस्तवैलक्षण्यमाह अजातमित्यादिना । कार्यकारणरूपाचिद्गतदोषाभावेन तद्व्यावृत्तिमाह अजातमित्यादिना । 'जायते अस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्यति' इत्यचेतनस्य भावविकाराः

नसन्नासन्नसदसदिति चेतनाचेतनवैलक्षण्यमुक्तं विशदीक्रियते असद्वा इत्यादिना । वक्ष्यते च सप्तमखण्डे ।

महान्तं बृहन्तमजमात्मानं मत्वा धीरो न शोचति ।

षडुच्यन्ते । तत्र उत्पद्यमानावस्था जन्म । उत्पन्नावस्था चास्तित्वम् । तदुभयाभावमाह **अजातमभूतमिति** । जन्म च, तदवच्छिन्नमस्तित्वञ्च नास्तीत्यर्थः। **अव्ययमिति** विनाशराहित्यं वक्ष्यते । उत्पत्तिविनाशमध्यकालभाविनः पृथिव्यादीनां ये विकाराः तद्राहित्येन तद्व्यावृत्तिमाह **अप्रतिष्ठित**मित्यादिना । प्रतिष्ठा=आधारः । पृथिव्यादीनि आधारसापेक्षाणि । ब्रह्म तु तदनपेक्षम् । **अशब्द**मित्यादिना कालपरिच्छेदाविनाभूतधर्मव्यावृत्तिरुक्ता । एवमजातमित्यादिना **अव्ययमि**त्यन्तेन कालतः परिच्छेदाभाव उक्तः । **महान्तं बृहन्तमिति** स्वरूपतो धर्मतश्च विपुलत्वमुक्तम् । तेन देशापरिच्छेद उक्तः । **आत्मानमिति** वस्त्वपरिच्छेद उक्तः । न हि वस्तुतः परिच्छिन्नो घटः अन्यस्यात्मा भवति । अयं तु सर्वस्यात्मा सर्वशरीरकत्वात् सर्वबुद्धीनां पर्यवसानभूमिः। वस्तुतः परिच्छिन्नो हि घटः पटादिबुद्धेर्न पर्यवसानभूमिरिति तद्व्यावृत्तिः । कर्माधीनदेहसंबन्धलक्षणोत्पत्तिमतां जीवानामप्यात्मशब्दवाच्यत्वात् तद्व्यावृत्त्यर्थम**जमात्मान**मित्युक्तम् । एवं त्रिविधपरिच्छेदरहितं समस्तचिदचिद्वस्तुविलक्षणं कारणत्वशङ्कितसद्गततदोषास्पृष्टं परमात्मानं मत्वा उपास्य

अजातमित्यादिना अचेतनवैलक्षण्यस्य प्रपञ्चनम् ; उपरि अप्राणमित्यादिना च चिद्वैलक्षण्यस्य । अप्राणमित्यादिकं, न तदश्नाति किञ्चनेत्यत्र तच्छब्दविशेषणम्; न तु पूर्वविशेषणम् पूर्ववाक्यस्य समाप्तत्वात् ; अवागिति नपुंसकप्रयोगाच्च । अत्र अशब्दमित्यादिपदेषु क्वचिद् बहुव्रीहिः, क्वचित् तत्पुरुष इति यथायथं ग्राह्यम्, यथा गार्गीब्राह्मणे अक्षरविद्यायां बृहदारण्यके। वस्तुत इति। वस्तुनेत्यर्थः।

अप्राणममुखमश्रोत्रमवाक् अमनोऽतेजस्कमचक्षुष्कमनामगोत्रम्
अशिरस्कमपाणिपादमस्निग्धमलोहितमप्रमेयमह्रस्वमदीर्घमस्थूलमन

धीरो न शोचतीति। सांसारिकदुःखं नानुभवति। मुक्तो भवतीत्यर्थः।

अजमिति व्यष्टिदेहविशिष्टदेवमनुष्यादिजीवव्यावृत्तिं सूचितां प्रपञ्चयति अप्राणमित्यादिना। अप्राणमिति प्राणाधीनस्थितित्व निवर्तितम्, न तु प्राणसम्बन्धमात्रम्। प्राणस्याप्यन्तर्यामित्वात् तस्य। 'यः प्राणे सञ्चरन्' इति हि वक्ष्यते। अमुखमिति। अपरभागसापेक्ष पुरोभागावयवविशेषो मुखम्। तदस्य न विद्यते सर्वत्राभिमुखत्वादित्यर्थः। अश्रोत्रमवागित्यादिना ज्ञानेन्द्रियाधीनज्ञानत्व कर्मेन्द्रियाधीनव्यापार निवर्तितम्। तेन तस्य स्वतस्सर्वज्ञत्व सर्वशक्तित्वञ्च दर्शितम्। अतेजस्कं मनोधीनप्रकाशरहितम्। अचक्षुष्कं रूपसाक्षात्कारे चक्षुरनपेक्षम्। अनामगोत्रमशिरस्कमपाणिपादमिति। नामगोत्रशब्दाभ्यां नामधेय कुलमुक्तम्। नाम कुलञ्च शिरः पाणिपाद्याद्यवयवाश्च न स्वरूपं विद्यन्त इत्यर्थः। लोके शिरःपाणिपादा अन्योन्यकार्याशक्ताः, अत्र तु सर्वत्र सर्वावयवकार्यशक्त इत्यर्थः। अस्निग्धमलोहितम्। मनुष्यदेहवत् स्नेहरक्तादिमान् न भवतीत्यर्थः अप्रमेयमिति। प्रमाणम् = इयत्ता। 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति प्रयोगात् अप्रमेयमपरिमेयम्। व्यष्टिदेहवत् इयत्तारहितम्। तदेव प्रपञ्चयन् महान्तमित्युक्तदेशापरिच्छेदं विवृणोति अह्रस्वमित्यादिना। अस्थूलम् अपीनम्। अनणु अकृशम्। स्थूलताप्रतिसम्बन्धिनो निषेध्यत्वात्। तस्मात् अनल्पम् अल्पपरिमाणरहितम्। अनल्पस्य समुद्रादेरप्यवधिमत्त्वदर्शनात् व्या-

वमनल्पमपारमनिर्देश्यमनपावृतमप्रकाश्यमसंवृतमनन्तरमग्राह्यं न तदश्नाति किञ्चन ; न तदश्नाति कश्चन ।

एतद्वै सत्येन दानेन तपसाऽनाशकेन ब्रह्मचर्येण निर्वेदनेना-

वृत्त्यर्थमाह **अपारमिति** । शतयोजनलक्षयोजनत्वादिविशेषणैर्निर्देष्टुमशक्यम् । तर्हि सर्वगतत्वात् सर्वत्र दृश्येतेत्यत्राह **अनपावृतमिति** । तिरोहितमित्यर्थः । अत्र हेतुमाह **अप्रकाश्यमिति** । चक्षुरादिभिः प्रकाशयितुमशक्यत्वादित्यर्थः । प्रमाणागोचरत्वे शून्यत्वं स्यादित्यत आह **असंवृतमिति** योगिनामतिरोहितमित्यर्थः । तेषां कुत्र प्रकाशत इत्यत्राह **अनन्तरमग्राह्यमिति** । **अनन्तरम्** नहि आदित्यमण्डलादौ प्रकाशते, **अग्राह्यम्** अन्तः हृदयपुण्डरीकेऽपि प्रकाशत इत्यर्थः । **न तदश्नाति किञ्चन** । सर्वत्रावस्थितमपि परं ब्रह्म न किञ्चनाश्नाति । कर्मफलत्वेन न किञ्चिदपि जीववत् भुङ्क्त इत्यर्थः । 'ज्ञानक्रियाभ्यां भगवान् भुङ्क्तेऽसौ प्रसभं विभुः' इति लीलारसभोक्तृत्वस्य प्रमाणसिद्धत्वात् । **न तदश्नाति कश्चन** । कश्चिदपि सांसारिकः कर्मफलमिव न तद् भुङ्क्त इत्यर्थः । वाक्यद्वयेन समस्तभोक्तृभोग्यविलक्षणमित्यर्थः [उक्तो भवति[1] ।]

मत्वा धीरो न शोचतीति तदुपासनमपवर्गोपायत्वेन पूर्वमुक्तम् । तस्याङ्गान्याह **एतद्वा इति** । यथार्थभूतहितवचनं **सत्यम्** । **तपसा** । 'तप आलोचने' । तत्त्वनिरूपणेनेत्यर्थः । [1] ब्रह्मचर्यं स्त्रीनियतिः [2] ।

सत्येनेत्यादिना अङ्गस्वरूपस्य वक्तव्यत्वात् तपसाऽनाशकेनेत्यत्र अनाशकपदमपि विशेष्यवाचकं स्वीक्रियते । तत्र तपःपदेन कृच्छ्रचान्द्रायणादिग्रहणे अनशनं पृथङ् न वक्तव्यमिति अनाशकपदस्य

शकेन षडङ्गेनैव साधयेत्। एतत् त्रयं वीक्षेत दमं दानं दयामिति।

अनाशकेन अनशनेन। यद्वा **तपः** कृच्छ्रचान्द्रायणादीति, **अनाशकं** फलाभिसन्धिरहितं यज्ञादिकम्, विनाशकेन फलभोगेन तदभिसन्धि-कर्तृत्वममकारेण(?) च रहितत्वात्। सत्यादिकमेव **षडङ्ग**शब्देनोच्यते। पुनश्च तदङ्गत्वेन प्रकृष्टतरं गुणत्रयमाह **एतत् त्रयमिति**॥ **दमं** मनोनियमनम्। **दानम्**। 'दैप् शोधने'। स्नानादिना शुद्धिः। प्रसिद्धदानस्य पूर्वोक्तत्वात् पुनरुक्तिप्रसङ्गात्। अनुक्तगुणान्तरसाहचर्येण **दान**शब्दस्याप्यनुक्तगुणपरत्वोपपत्तेश्च। **यद्वा** आदरातिशयात् **दानस्य** पुनरपि कीर्तनम्। **दया** स्वप्रयोजनानपेक्षं परदुःखासहत्वम्।

यज्ञपरत्वमाह यद्वेत्यादिना। इतिशब्दो हेत्वर्थः। तपःपदेन कृच्छ्रादेरुक्तत्वादित्यर्थः। तदभिसंधिकर्तृत्वममकारेणेत्यत्र पाठो निर्दोष्यः। त्रयाणां समाहारद्वन्द्वेन वा एकवचनं समर्थनीयम्। तदभिसंधिः फलापेक्षा। ब्रह्मचर्यं स्त्रीनियतिः इति वाक्यं रहितत्वादित्येतदनन्तरं पाठ्यम्; स्थलात्। निर्वेदनेनेत्यस्य निर्वेदार्थकत्वं स्पष्टमिति तत् पदं हानेनेति पदमिव न व्याख्यातम्। अनाशकेन षडङ्गेनेत्यत्र अनाशकपदं षडङ्गविशेषणं स्यात्। पूर्वोक्तरीत्या विनाशकरहितेनेति तदर्थः। षडङ्गेनेति समाहारः पत्न्यभावेऽपि कार्यसिद्धिं दर्शयति। एवकारो वक्ष्यमाणेन दमादित्रयेणास्य वैकल्पिकत्वमतिं वारयति; अङ्गानि विना ज्ञानाभ्यासमात्रेणोपासनं साधयितुं शक्यमिति मतिश्च। साधयेदित्यत्र एतदिति वाक्योपक्रमस्थं कर्म। ब्रह्मोपासनमिति वा ब्रह्मेत्येव वा तदर्थः। अत्र दानेनेत्येतत् बृहदारण्यके (७.२.) देवान् मनुष्यान् असुरांश्च प्रति क्रमेण प्रजापतिकृतोपदेशार्थवादपूर्वकं "दाम्यत दत्त दयध्वमिति तदेतत्त्रयं शिक्षेद् दमं दानं

न तस्य प्राणा उत्क्रामन्ति। अत्रैव समवलीयन्ते। ब्रह्मैव सन् ब्रह्माप्येति,

---

एवं साङ्गब्रह्मोपासनफलमाह न तस्येत्यादिना। य एवम् उक्तैरङ्गैः सह वेद परं ब्रह्मोपास्ते,--'उपासीत' इत्यसकृद्वक्ष्यमाणत्वात् सामान्यशब्दस्य विशेषपर्यवसायित्वाच्चोपासनात्मकं वेदनं विवक्षितम्--, तस्य उपासकस्य—सम्बन्धमात्रे षष्ठी—तस्मादुपासकात् प्राणाः नोत्क्रामन्तीत्यर्थः। यथा 'नटस्य शृणोति' इत्यत्र नटाच्छृणोतीत्यर्थः, तद्वत्। एकादशेन्द्रियाणि मुख्यप्राणश्च प्राणा उच्यन्ते। ते सूक्ष्मशरीरस्था अर्चिरादिमार्गगमनार्था उपासकं न जहतीत्यर्थः. 'न तस्मात् प्राणा उत्क्रामन्ति' इति शाखान्तरवाक्यैकार्थ्यात्। 'कोशं भिनत्ति शीर्षकपालं भिनत्ति पृथिवीं भिनत्ति' इत्युपक्रम्य, 'अव्यक्तं भिनत्ति अक्षरं भिनत्ति तमो भिनत्ति' इत्यन्तेन अस्यामेवोपनिषदि ब्रह्मविदुत्क्रान्तेर्वक्ष्यमाणत्वाच्च। "प्रतिषेधादिति चेन्न शारीरात् स्पष्टो ह्येकेषाम्" इति ब्रह्मसूत्रम्। ब्रह्मैव सन् ब्रह्मसमानाकारस्सन् ब्रह्मापदं नि ब्रह्मण्यप्येति

द्याम्" इति विहितत्रयोपलक्षणमित्याशयेनोच्यते एतत् त्रयमिति। वीक्षेतेत्यस्य शिक्षेतेत्यर्थः। नथेन वा पाठः।

न तस्य प्राणा इत्याद्यर्थविस्तरो बृहदारण्यके द्रष्टव्यः (६.४.)। अत्रैव समवलीयन्ते इत्यस्य अर्चिरादिगत्यर्थं तत्स्थ पित्ते सूक्ष्मशरीर एव लीयन्ते· न स्थूलशरीरान्तरं प्रति यान्तीत्यर्थः। यद्वा अत्रैवेत्यस्य प्रकृतार्थैवेत्यर्थ.। एवञ्च न तस्य प्राणा उत्क्रामन्तीत्यस्य तदीयाः प्राणाः न तत्प्राप्यं प्रति परं स्थानं प्रत्युत्क्रामन्तीत्यर्थवर्णनेऽपि न दोषः। तेन तस्मात् अपक्रान्तो देह इति सिद्ध्यति। अथवा 'अत्रैव समवलीयन्ते' इत्यस्य जीवसंसृष्टा एव भवन्ति, न तु तं त्यजन्तीति

य एवं वेद ॥   ॥ इति तृतीयः खण्डः ॥

आत्यन्तिकलयं गच्छति । परित्यक्तकर्मकृतदेवमनुष्यादिनामरूपे(पो ?) ब्रह्मणि सर्वकारणे सर्वाधारभूते प्रतिष्ठितो भवति । कार्यस्य नामरूपप्रहाणेन कारणावस्थान हि लय । तदानीं ब्रह्मणि वर्तमानस्य ब्रह्मसमानाकारतयाऽवस्थानमुपपन्नम् । परित्यक्तदेवादिरूपस्य ब्रह्मसारूप्यञ्च अपहतपाप्मत्वादिगुणाष्टकाविर्भावलक्षणम् । 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प' इति दहरवाक्ये प्रजापतिवाक्ये च गुणाष्टकाम्नानात् ।

निर्विशेषज्ञानमात्रब्रह्मतापत्तिपरत्वमस्य वाक्यस्यानुपपन्नम्—य एवं वेद स ब्रह्मैव सन्निति पदानामनन्वितत्व त् । वेदितुः ब्रह्मतापत्तिप्रतीते । वेदितुर्वृत्तिमात्रतापत्तेरनुपपन्नत्वाच्च । किञ्च ब्रह्माप्येतीति वाक्यस्य ब्रह्मशब्दद्वितीयानुरोधेन प्राप्तिर्वा, अप्येतीतिशब्दस्वारस्यानुरोधेन तत्र लयो वा अर्थ स्यात् । ब्रह्मैव सन्निति ब्रह्मतापन्नस्य ब्रह्मभावातिरेकेण प्राप्तेर्लयस्य चाभावात्, 'ब्रह्माप्येति' इति वाक्यांशोऽनर्थक स्यात् । 'ब्रह्मतापन्नस्य काल्पनिकनामरूपभेदप्रहाणमप्यय' इति चेत्, व्यतिरेकेण ब्रह्मभावो नाम अर्थान्तर नास्तीति, ब्रह्मैव सन्निति वाक्यांशोऽनर्थक स्यात् । 'प्रागेव ब्रह्मानन्य आत्मा । तस्मात् काल्पनिकभेदलय एव विद्याफलमित्यर्थ' इति चेत्, 'य एवं वेद, स ब्रह्मैव सन् ब्रह्माप्येति' इति ब्रह्मतापत्तेर्वेदनफलत्वप्रतीतिस्वारस्यभङ्ग । किञ्च

पूर्वापरयोः सौत्रार्थ एवेद भाष्यमिमत स्यात्; अधिकस्यानुक्तत्वात् । "प्रतिषेधात्" इति सूत्रटीकाया तथैवोक्तत्वाच्च ।

क इह, ब्रह्मैव सन्नित्युच्यते ? किं ज्ञप्तिमात्रम् ? तर्हि वाक्यवैघट्यम् । यो वेद स ब्रह्मैव सन्नित्युच्यते ; न तु या वित्तिः सा ब्रह्मैव सती ब्रह्माप्येतीति । अतो वेदितुरेव ब्रह्मतापत्तिः प्रतीयते । वेदिता च ज्ञाता । स चाहंकारः । काल्पनिकोऽहंकारो जडः, नात्मेति तस्य ब्रह्मभावाभावात् ब्रह्माज्ञानवादपक्षे इयं श्रुतिरत्यन्तविरुद्धा । अतो यथोक्त एवार्थः॥

इति हरितकुलतिलकवाग्विजयिसूनोः श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयस्य श्रीसुदर्शनार्यस्य कृतौ

सुबालोपनिषद्विवरणे तृतीयः खण्डः ॥

॥ श्रीसुदर्शनार्यमहादेशिकाय नमः ॥

एवं खण्डत्रयेण परस्य ब्रह्मणो जगत्कारणत्वम् , तत्प्रयुक्तदोषशङ्कानिवारणार्थं विश्वविलक्षणत्वञ्चोक्तम् । अपवर्गोपायश्च सत्याद्यनुगृहीतं तदुपासनमिति च संक्षेपत उक्तम् । अथ उपासनविशेषान् पञ्च (पञ्चमे?) प्रपञ्चयितुं उपासनस्थानेषु प्रधानं हृदयकमलं प्रस्तुत्य तत्रावस्थितस्य जीवस्य परमात्मोपासनविशेषोपजननाय प्रकृतिसम्बन्धसंकुचितज्ञानस्यास्य ज्ञानसंकोचविकासतारतम्यकृतो जागराद्यवस्थायोग. चतुर्थेन खण्डेन प्रतिपाद्यते ।

एवं खण्डत्रयेणेति । अयं भावः—सुबालोपनिषद्वृत्तिं सरसं मनसि निधायैव सूत्रकारो नूनं शारीरकं निबबन्ध । तत्र हि प्रथमेऽध्याये जगत्कारणत्वं नारायणस्य निरूप्य द्वितीयेऽध्याये सर्वजगन्निमित्तोपादानस्य चेतनाचेतनाविशेषोत्प्रेक्षितानेकदोषशङ्कापरिहारेण सर्ववस्तुवैलक्षण्यं व्युत्पाद्य, तादृशस्य तस्य प्राप्त्यर्थोपासनविषयतृष्णाभिवर्धनाय जीवस्य जागरस्वप्नसुषुप्त्याद्यवस्थावस्थितदुरवस्थास्थापनपूर्वं परस्यैतद्विलक्षणस्य विषये बहून् भक्तिमार्गान् माहात्म्य-

॥ अथ चतुर्थः खण्डः ॥

हृदयस्य मध्ये लोहितं मांसपिण्डम्, यस्मिंस्तत् दहरं पौण्डरीकं

हृदयस्य मध्ये लोहितं मांसपिण्डमिति । अत्राय हृदयशब्दः शरीरे वक्षःस्थलोपलक्षितप्रदेशपरः । तस्य मध्ये **लोहितं** रक्तवर्णं मांस-

---

सीयेऽध्याये संप्रतिबोध्य तुरीये तत्प्राप्तिप्रकारं भगवान् बादरायणः प्रास्तौषीत् । इह चोपनिषदि प्रथमं खण्डद्वयेन परमपुरुषस्य अद्वारकं सद्वारकञ्च स्थितं जगज्जन्मादिकारणत्वमभिधाय तृतीयेन तस्य चेतनाचेतनवैलक्षण्यम् अत एवोपासनार्हत्वञ्चोपपाद्य तदुपासिसिषोत्पादनाय चतुर्थेन जीवस्य जाग्रदादिदुरवस्थाः प्रज्ञाप्य पञ्चमेन तदुपासनप्रकारान् उपदिश्य शेषमपि शेषेषु खण्डेषु समुपवर्णितमिति ।

तदित्यस्य, 'यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इति दहरपुण्डरीकत्वेन प्रसिद्धमित्यर्थः । पौण्डरीकमिति । पुण्टरीकमित्यपि पाठोऽस्ति । सर्वथा इदमेव हृदयबोधकं विशेष्यपदम् ।

अत्रायं हृदयशब्द इति। अत्र सुबालोपनिषदि । तेन, 'पद्मकोशप्रतीकाशं हृदयञ्चाप्यधोमुखम्' इति तैत्तिरीयश्रुतहृदयशब्दव्यावृत्तिः। तस्य पुण्डरीकाकारभागपरत्वात् । अत्रापि अनन्तरवाक्ये, हृदयस्य दशोत्पत्त यथातैत्तिरीयमर्थस्वीकारात् अयमित्युक्तम् । अथवा एकेन पदेन उत्तरहृदयपदव्यावृत्तिः ; अन्येन पुण्डरीकाकारहृदयाधारमांसपिण्डगर्भकत्वरूपः अर्थान्तरपरत्वसाधको हेतुर्दर्शितः ॥ द्वितीयहृदयशब्दस्यापि समानार्थकत्वं कस्मान्नेति चेत्—दशानां छिद्राणां वक्षःप्रदेशे अभावात्, तत्रैव भावादिति भाव्यम् । किञ्च, यस्मिंस्तद्दहरमित्यत्र तदिति पदं तावत् हृदयमित्यर्थकं सत् दहरस्य हृदयत्वेनान्यत्र प्रसिद्धिं गमयति । एवं तर्हि, 'तस्य दशच्छिद्राणि'

कुमुदमिवानेकधा विकसितम् ।
हृदयस्य दश छिद्राणि भवन्ति ; येषु प्राणाः प्रतिष्ठिताः ।

पिण्डं स्थितमित्यर्थः । **यस्मिन् तद्दहरं पौण्डरीकमिति** । पुण्डरीकमेव **पौण्डरीकम्** । उपमानोपमेयभावेन पुण्डरीकसंबन्धीति वाऽर्थः । 'पद्मकोशप्रतीकाशं हृदयञ्चाऽप्यधोमुखम्' इति [हि?] श्रूयते । यस्मिन् मांसपिण्डे **पौण्डरीकं** पद्मकोशसदृशावयवविशेषः तिष्ठतीत्यर्थः । हृत्पद्मं मांसविशेषेण परित आवेष्टितत्वात् मांसपिण्डमध्यस्थितमित्युक्तम् । **कुमुदमिवानेकधा विकसितमिति** । वर्णेन कुमुदसन्निभम् । तस्य चन्द्रकान्तसमानत्वं हि योगशास्त्रेषूच्यते । अनेकधा विकसितं–विकासयोग्यम् अनेकधा शब्दादिनानाविषयज्ञानप्रसरानुगुणावकाशमित्यर्थः ।

तदेव विवृणोति **हृदयस्य दश छिद्राणि भवन्तीति** । अयं हृदयशब्दः पद्मकोशसदृशावयवपरः । **छिद्राणि** नाडीमुखसम्बन्धद्वाराणि । **येषु प्राणाः प्रतिष्ठिता** इत्यनेन नाडीछिद्रत्वं स्पष्टम् । इह बहुवचनान्त **प्राण**शब्देन इन्द्रियाणि विवक्षितानि । यद्वा प्राणापानादयो विवक्षिताः ।

इत्येव कस्मान्न पठ्यते उपरीति चेत्—मुख्यहृदयत्वं तस्यैवेति ज्ञापनाय हृदयशब्देन निर्देश इति । किञ्च यदि द्वितीयं हृदयपदं वक्षःप्रदेशार्थकम्, तर्हि हृदयस्येत्यारभ्य विकसितमित्यन्तं वाक्यमुपर्येव पाठमर्हति ; प्रकृतानुपयोगादिति हृदयम् । सर्वेन्द्रियपञ्जभूतत्वञ्चास्यैव जीवाधारस्य युक्तम् । शेषमुपरिष्टात् । नाडीति । तत्तदिन्द्रियनाडीत्यर्थः । उपरि प्राणव्यानापानादिनिर्देशानुगुण्यात् आभ्यन्तरवायावपि दशधा विभागस्य प्रसिद्धत्वात् दशच्छिद्रवर्तिनः प्राणाः तेऽपीत्याशयेनाह यद्वा प्राणापानादय इति । श्रुतौ व्यानस्य

स यदा प्राणेन सह संयुज्यते, तदा पश्यति नद्यो नगराणि बहूनि विविधानि च। यदा व्यानेन सह संयुज्यते, तदा पश्यति

योगदशाया वायुविशेषस्य ज्ञानविकासकारणत्वमाह **स यदे**त्यादिना। **स यदा प्राणेन सयुज्यते, तदा पश्यति नद्यो नगराणि बहूनि विविधानि चेति**। उपासकत्वेन पूर्वखण्डप्रस्तुत इह च शरीराद्यधिष्ठातृत्वेन बुद्धिस्थो जीवात्मा स इत्युच्यते। यदेति योगकालो विवक्षित। एकवचनान्तोऽत्र **प्राण**शब्द प्राणाख्यवृत्तिमद्वायुविशेषपर। **प्राणेन सह सयुज्यते**। मनसा प्राणसयुक्तत्वेन भावित इत्यर्थ। यत्र हि मन, तत्र हि वायु। नद्यः नदी। पश्यतीति।

अपानात् पूर्व पठनमेतच्छाखीयाना प्राणाहुत्यादौ व्यानस्यैव प्राणानन्तरं ग्रहणात् स्यात्।

पुरुषस्य प्राणसंयोग. सर्वैदैव सर्वस्यास्तीति यदेत्यादिनिर्देशोऽनुपपन्न इति संयुज्यत इत्यस्य संयुक्तमनस्क इत्यर्थाभिप्रायेण योगिजीवपरतया स यदेत्यादिवाक्य नयति उपासकत्वेनेत्यादिना। न च स यदेत्यादिकं सर्वं स्वप्नदशावर्णनपरमेवास्तु, उपरि अथैता दश नाड्य इति च, सुषुप्तिवाक्यमध्ये अथात्रैतदिति अथशब्दवत्त्व बाधक भवेदिति वाच्यम्—अथ द्वितीये कोशे इति स्वप्नकोशस्य द्वितीयतया वर्णनात्, तदुपरि सुषुप्तौ, हृदयाकाशे परे कोशे इति तृतीयकोशकथनात् प्रथम प्रथमकोशवृत्तमेव वक्ष्यत इति प्रतीत्या जागरपरताया एतत्त वाक्यसमुदाये भाव्यत्वात्। तत्र यदेत्यादिनिर्देशात् देवपक्षादिदर्शनकथनवशाच्च सर्वपुरुषजागरपरत्वासंभवे सिद्धे योगिपरत्वावधारणात्। प्राणसंयुक्तत्वेन भावित इत्यत्र स्वयमिति शेष। भावित इति कथन मनोरूपसहकारिप्रदर्शनार्थम्। ग्राह्यविषय विमृश्य तदनुरूपे वायुविशेषे च मनोऽवस्थाप्यते चेत्, तद्विषयदर्शन योगिनो भवतीत्यर्थः।

देवांश्च ऋषींश्च। यदाऽपानेन सह संयुज्यते, तदा पश्यति यक्षराक्षसगन्धर्वान्। यदा तूदानेन सह संयुज्यते, तदा पश्यति देवलोकान् देवान् स्कन्दं जय(जयन्त)श्चेति। यदा समानेन सह संयुज्यते, तदा पश्यति देवान् लोकान् धनानि च। यदा वैरम्भेण सह संयुज्यते, तदा पश्यति दृष्टश्चादृष्टश्च श्रुतश्चाश्रुतश्च भुक्तश्चाभुक्तश्च सच्चासच्च। सर्वं पश्यति सर्वं पश्यति।

अथेमा दश नाड्यो भवन्ति। तासामेकैकस्यां द्वासप्ततिर्द्वा-

व्यवहितान्यपि नद्यादीनि पश्यतीत्यर्थः। **यदा व्यानेन सह संयुज्यत** इत्यादिवाक्यानामप्यनया दिशा निर्वाहो वेदितव्यः। **यदा तूदानेनेति।** **देवान्।** देवलोकस्थानिति शेषः। **जयं** जयाभिमानिदेवताम्; जयन्तं वा। तलोपश्छान्दसः। प्रधानभूतदेवताप्रदर्शनार्थं स्कन्दाद्युक्तिः। **धनानीति।** भूमिनिहितानीत्यर्थः। **वैरम्भः** वायुविशेषः। उपरि व्यक्तीभविष्यति। **दृष्टश्रुतादिकीर्तनं** दृष्टान्तार्थम्। जन्मान्तरे दृष्टं वा। **सर्वं पश्यती**त्यभ्यास आदरकृतः। एवं प्राणादिविशेषप्रसङ्गेन तत्प्रशंसा कृता। अयोगदशायामदर्शनं लोकसिद्धत्वादनुक्तम्। एवञ्च हृदयकमलस्थस्य जीवात्मनः प्राणेन्द्रियव्यापारवतो जागरावस्था दर्शिता भवति।

अथ स्वप्नाद्यवस्थाद्वयं वक्तुं तयोरवस्थयोर्जीवस्य स्थानभूतान् नाडीविशेषानाह **अथेमा दश नाड्यो भवन्तीति।** **नाड्यः** प्रधान-

---

तलोप इति। जयन्तमिति पाठोऽप्यस्ति।

उपरीति। नवमखण्ड इत्यर्थः। सत् वर्तमानम्। असत् अतीतमनागतञ्च। जागरावस्थेति। येषु प्राणाः प्रतिष्ठिताः इति पूर्ववाक्येनैव जागरसामान्यमक्तप्रायं मन्तव्यम्। एवं योगकाल एवैवंप्रतीत्या अन्यदा तदद[illegible]तो जुगुप्सितत्वं [illegible]पितं भवति।

सप्ततिः शाखानाडीसहस्राणि भवन्ति, यस्मिन्नयमात्मा स्वपिति शब्दानाञ्च करोति ।

नाड्यः । तासामिति । प्रधाननाडीसंसृष्टा अप्रधानसिराः शाखानाड्य. । उक्तानां नाडीना विनियोगं सामान्येन दर्शयति यस्मिन् अयमात्मा स्वपितीति । नाडीसमूहाभिप्रायेण यस्मिन्नित्युक्तम् । स्वपितीतिशब्दोऽत्र न सुषुप्तिपरः ; अपि तु सुषुप्तिस्वप्नसाधारणनिद्रापर.। उपरतबाह्येन्द्रियव्यापारो यत्र वर्तत इत्यर्थ । स्वप्नसुषुप्तिसाधारणचेष्टामाह शब्दानाञ्च करोतीति । द्वितीयार्थे षष्ठी । शब्दान् करोतीति ।

दशच्छिद्राधिष्ठितवायुविशेषसहकारेण भवन् जागरविशेष उक्तः । अवस्थान्तरस्थानभूतदशनाडीसंबन्धमाह अथेमा इति । 'हृदयस्य दशछिद्राणि' इति वाक्यात् हृदयस्येत्यस्यौचित्यादनुषङ्गः। इमाश्च ज्ञानकर्मेन्द्रियदशकनिबन्धनभूता इति विमृश्यम् । नाडीनां स्वप्नस्थानत्ववत् सुषुप्तिस्थानत्वमपि निर्बाधम् । "तदभावो नाडीषु तच्छ्रुतेरात्मनि च" इति सूत्रे नाडीनां सुषुप्तिस्थानत्वस्वीकारात्।

एवञ्च तत्रोदाहृतस्य बृहदारण्यकवाक्यस्य (४. १) तत्परत्वेऽपि कौषीतकिब्राह्मणे स्वप्नस्थानपरत्वमपि श्रुतम् । "नाडीनां स्वप्नस्थानत्वात्" इति जगद्वाचित्वाधिकरणभाष्यञ्च कौषीतकिब्राह्मणगतप्रकृतवाक्याभिप्रायम् । ताश्च सुषुप्तिनाड्यः हितानामिकाः प्रत्येकं द्वासप्ततिसंख्याकशाखानाडीमत्तया बृहदारण्यके उक्ताः । इहापि तथा श्रवणात् उभयपरमेवेदं वाक्यमिति भावः । (एवञ्च तास्वेव नाडीषु स्थानभेदः स्वाप्नसुषुप्तिभेदाय ग्राह्यः ।)

समूहेति । यच्छब्दार्थभूतासु नाडीषु एवत्वस्य एकवचनोक्तस्य समुदायद्वारा अन्वय इति भावः । अणोरात्मन एकत्रैव स्थिति-

अथ द्वितीये स कोशे स्वपिति । तदेमञ्च लोकं पश्यति सर्वान्

अबुद्धिपूर्वकमवशप्रलपितं करोतीत्यर्थः । स्वप्ने भयाद्यतिशयात् आक्रोशादिसंभवः । सुषुप्तावपि वातविकारात् अवशप्रलपितसंभवः ।

एवं स्वप्नसुषुप्त्योः साधारणाकारमुक्त्वा स्वप्नावस्थामाह **अथ द्वितीये स कोशे स्वपितीति** । अथ जागरानन्तरम् । कोशशब्दः स्थानपरः । प्रथमस्थानं हृदयपुण्डरीकम् । तत्र स्थितस्य जागरः । यदा तदनन्तरं द्वितीयकोशस्थाने (द्वितीये कोशे = स्थाने !) उक्तानां नाडीसहस्राणां मध्ये कस्मिंश्चिन्नाडीसमूहविशेषे स्वपिति निद्रायते, तदा स प्रस्तुत संप्रसादो जीवात्मा इमञ्च लोकं परञ्च लोकं च (?)

सूचनार्थमेकवचनम् । शब्दानामिति षष्ठी शब्दमध्ये यं कमपि शब्दमित्यर्थज्ञापनार्थः; 'पलेपां मे देहि' (छा.१.१०) इतिवत् ।

संप्रसाद इति । जागरावस्थागतकालुष्यराहित्यपरः संप्रसादशब्दः । 'एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य' इति चरमशरीरवियोगसंनिकृष्टो जीवो निर्दिष्टः । "भूमा संप्रसादात्—" इति सूत्रे, "शुद्धस्वरूपाभिप्रायेण सूत्रे संप्रसादनिर्देशः कृतः" इति एतद्भाष्यकृद्भिः टीकायां प्राकाशि । अतः स्वप्नावस्थजीवमात्रे संप्रसादशब्दनियमाभावात् स संप्रसाद इत्यादेः, 'सः स्वप्नावस्थो जीवः संप्रसादशब्दवाच्य इति आचक्षते' इत्यर्थायोगात्, पृथग्वाक्यतायां प्रमाणाभावाच्च, 'स संप्रसादः सर्वान् शब्दान् विजानाति' इति पूर्वेणैकवाक्यता । 'सर्वेन्द्रियव्यापारसंपत्तिसमयेऽपि यः सर्वं न जानाति, स कथमुपरतेन्द्रियः सुप्तः इमं लोकं सर्वान् शब्दान् परञ्च सर्वं जानीयात्' इत्याशङ्कापरिहाराय संप्रसादत्वविशेषणम् । अकलुषत्वमेव ह्यस्य स्वभावः । 'सर्वं ह पश्यः पश्यति' इति श्रिल

शब्दान् विजानाति स संप्रसाद इत्याचक्षते ।

प्राण. शरीरं परिरक्षति । हरितस्य नीलस्य पीतस्य लोहितस्य श्वेतस्य नाड्यो रुधिरस्य पूर्णाः ।

पश्यति । जाग्रदवस्थादृष्टसजातीयश्च लोकम् ईश्वरसृष्टं पश्यतीत्यर्थः । 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति । अथ रथान् रथयोगान् पथ सृजते । स हि कर्ता' इति श्रूयते । पश्यतीति चक्षुर्व्यापार उक्त । अथ श्रोत्रव्यापारमाह सर्वान् शब्दान् विजानातीति । इदमीश्वरसृष्ट-शरीरस्थेन्द्रियान्तरव्यापाराणामपि प्रदर्शनार्थमुक्तम् । इत्याचक्षत इति । स्वप्नावस्था स्वप्नविदो वदन्तीत्यर्थ ।

अथ सुषुप्तिं वक्तुमारभते प्राणः शरीरमित्यादिना । सुषुप्तिकाले जीवेच्छ प्रयत्नौ विनाऽपि परमात्मसंकल्पप्रेरितो मुख्य प्राण शरीरं परिरक्षति यत इत्यर्थ । प्राणसंचारस्थानभूता नाडीर्विशिनष्टि हरित-

---

पश्यत्स्वभावस्य परिस्थिति । स जाग्रदवस्थारूपप्रतिबन्धकविरहे प्राचीनकर्मानुगुणप्रसादविशेषात् सर्वं द्रष्टुमलमिति दर्शित भवति। तेन स्वाप्निकपदार्थाना वास्तवत्वमपि स्थापित भवति , प्रसन्नपुरुष प्राह्य पजापनात् । एवमेकवाक्यतायाञ्च आचक्षत इत्येतत्, 'एव स्वप्नवृत्त वदन्ति' इत्यर्थक भवतीति स्वप्नवर्णनमत्र समाप्तमिव लक्ष्यते इति विमृश्य, प्राण शरीरमित्यादिक सुषुप्तिपर व्याख्यातम्। अन्यथा पुन :'प्राणेन रक्षन्नवर कुलाय बहिष्कुलायादमृतश्चरित्वा' (बृ ६ १०), 'हिता नाम हृदयस्य नाड्यो हृदयात् पुरिततमभिप्रतन्वन्ति । यथा सहस्रधा केशो विपाटित , तावदण्व्य पिङ्गलस्याणिम्ना तिष्ठन्ते शुक्लस्य कृष्णस्य पीतस्य लोहितस्येति । तासु तदा भवति' (कौ ४) इति श्रुत्यन्तरानुसारेण स्वप्नपरत्वमपि पूर्णा. इत्यन्तस्य सुवचम् । जागरे शरीरव्यापारायासबाहुल्यात् नाडीना रुधिरपूर्णता न

अथास्यैतद् दहरं पौण्डरीकं कुमुदमिवानेकधा विकसितम्। यथा केशः सहस्रधा भिन्नः, तथा हिता नाम नाड्यो भवन्ति।

स्येति । हारित्तादिपदानि रुधिरविशेषणानि । ईषत्पीतं हरितम् । लोहितं शोणवर्णम् । रुधिरस्य रुधिरेण नाड्यः पूर्णा भवन्ति । आयासाभावात् नाडीषु रक्तं न्यूनाधिकभावविरहेण व्याप्तमित्यर्थः । पूर्वं नाडीविशेषाः स्वप्नस्थानत्वेनोक्ताः ।

अथ नाडीविशेषाणामेवान्येषां सुषुप्तिस्थानत्वं वक्तुं तेषामपि हृदयकमलसंबन्धकथनार्थं हृदयं पुनः प्रस्तौति अथास्येति । पूर्ववदर्थः । तत्संबन्ध (द्ध?) नाडीबाहुल्यमाह यथा केशः सहस्रधा भिन्नः तथा हिता नाम नाड्यो भवन्तीति । हृदयसंबद्धा भवन्तीत्यर्थः । तासां

भवतीति सुषुप्तौ पूर्णतावर्णनं यदत्र सरसमुपपादितम्, तत् स्वप्नेऽपि हि भवितुमर्हति; प्रत्यक्षशरीरस्य प्रयासराहित्याविशेषात्। अथास्येत्यादिकं सुषुप्तिविषयमिति तु निर्विवादम्।

अथास्येति । अत्रेति पदं नाडीष्वित्यर्थकम्। तथाच यत् पूर्वोक्तं दहरं पुण्डरीकम्, तदत्र भवति, यत्र पुण्डरीके जीवः सुषुप्तो भवतीत्युच्यते । तदभावाधिकरणे, "नाडीपुरीततौ प्रासादखट्वास्थानीयौ" इति श्रीभाष्यानुरोधेन हितानाड्यधिकरणकपुरीतद्गतत्वस्य सुषुप्त्याधारहृदयकोशेऽवधारणात्। इदमेव नाडीगतं परे कोशे इति कथ्यते समनन्तरम्। यथा केश इति। स्वप्नस्थानभूतानां नाडीनामपि हितानामकत्वस्य सहस्रधापाटितकेशवद्भावस्य च कौषीतकिश्रुत्युक्तत्वात् सुषुप्तिनाडीनां तासामैक्यं वा भेद एव वेति विमृश्यमेतत्। ऐक्येऽपि तत्र प्रदेशभेदोपपादनाय केशः सहस्रधेत्यादिपूर्वकं पुनस्तन्निर्देश इह घटेत। एवम् अथेमा दश नाड्य इति पूर्वमारम्भात् इन्द्रियदशकनिबन्धनभूतास्ता एव स्थान-

हृदाकाशे परे कोशे दिव्योऽयमात्मा स्वपिति, यत्र सुप्तो न कञ्चन काम कामयते, न कञ्चन स्वप्नं पश्यति ।

न तत्र देवा देवलोका यज्ञा वा ।

हिताख्याना नाडीना सुषुप्त्याधारत्व पुरीतद्व्यवहितमिति श्रुत्यन्तरे विशदमर्थमिह दर्शयति **हृदाकाशे परे कोशे दिव्योऽयमात्मा स्वपितीति** । हृदि आकाशेऽवस्थितोऽयमात्मा **परे कोशे** अन्यस्मिन् स्थाने मांसपिण्डशब्देन पूर्वमुक्ते पुरीतदाख्ये स्थाने स्वपितीत्यर्थ । 'हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते । ताभि प्रत्यवसृप्य पुरीतति शेते' इति हि श्रुत्यन्तरम् । हृदयवेष्टनमास पुरीतच्छब्देनोक्तम् । तदिह स्थानान्तरत्वेनोच्यते । हृदये जागर । नाडीविशेषेषु स्वप्न । हिताख्यनाडीविशेषान्विते पुरीतति सुषुप्तिरिति विभाग । यत्र तृतीयस्थाने । **न तत्र देवा देवलोका यज्ञा वेति ।**

भेदेन स्वप्नसुषुप्तिनिर्वाहिका: जागरसंबन्धिन्य । एतदधिकरणकोपासनमेव चानन्तरे खण्डे प्रस्तोष्यत इति विभाव्य भवति । ननु अथावेत्यारभ्य एतद्वाक्यपरामर्शे च पूर्वं हृदयस्य दश छिद्राणीति यान्ये हृदयस्येति न पुण्डरीकार्थकम्, किंतु उपक्रान्तहृदयपदसमानार्थमिति, यत् तत्र प्रस्तुतं दहरपुण्डरीकम्, तस्यैव संबन्ध इति च ज्ञायते । न । एकादशखण्डे दहर पुण्डरीकं प्रस्तुत्य, 'तस्य मध्ये समुद्र , समुद्रस्य मध्ये कोश , तस्मिन्नाड्यश्चतस्रो भवन्ति' इति नाड्यन्तरचतुष्टयप्रस्तावात् इहोक्ता नाड्य कोशव्यतिरिक्तस्थानगता इति ज्ञायते । तत् स्थान स्थूलहृदय वा दहरपुण्डरीक वेति परामर्शे, 'हृदयस्य नाड्यो हृदयात् पुरीततमभिप्रतिष्ठन्ते' इत्येतदनुसारेणार्थनिश्चय: कार्य । दश छिद्राणि तु दहरपुण्डरीके नाडीमूलस्थानानि ।

न माता न पिता न बन्धुर्न बान्धवो न स्तेनो न ब्रह्महा नतेजस्कायममृत सलिल एव । इदं सलिल वनम् ।

देवा[देहा]दय सुपुप्तौ न दृश्यन्त इत्यर्थ । न मातेत्यादि । सुपुप्त पुरुष न माता भवति । न पिता भवति । मातृत्वपितृत्वाद्यभिमानरहितो भवतीत्यर्थ । बन्धुः प्रकृतिसम्बन्धवान् । बान्धवः सुहृदादि । नतेजस्कायममृतमिति । अमृत मरणादिरहितमात्मवस्तु नतेजस्कायम् । तेजश्शब्दो ज्ञानपर । कायशब्दो निकायपर । विविधज्ञानसमूहरहितमित्यर्थ । सलिले । सलिले, सलिलकार्ये शरीरे वा वर्तत इत्यर्थ । सलिलशब्द विवृणोति इद सलिल वनमिति । वनम् । 'वन षण सम्भक्तौ' । आत्मन सम्भजनीयमिद शरीर सलिलकार्यत्वात् सलिलमित्यर्थ । इद सलिल छन्नमिति पाठे इद शरीर छन्नम्=सुपुप्तस्य न भासत इत्यर्थ ।

न तत्र देवा इत्यादिना न सुपुप्तस्य देहाद्यपेक्षया भेदो वर्ण्यते जागरेऽपि तस्य भेदस्य सत्त्वात् । अत, बहुवचनाद्यनुरोधाच्च न दृश्यन्त इति वाक्यार्थ एव वक्तव्य । न मातेत्यादावपि एवमेव वाक्यार्थवर्णन श्रुत्यभिमत चेत्, यत्र वा इति वाक्यपो न स्यात् । अतः तद्बलात् तत्पर्यन्त काचित् शैली, अथान्येति प्रतीत्या, अध्याहारगौरवपरिहाराय च सुपुप्तजीवो न माता भवतीत्याद्यर्थवर्णनम् । बन्धु प्रकृतिसंबन्धवानिति । स्वस्वमातापित्रादिशरीरानुबन्धशालीत्यर्थ । नतेजस्कायमिति पाठदर्शनेन धर्मभूतज्ञानसमूहरहितम् इत्यर्थवर्णनम् । अनेन पदेन न माताभवतीत्यादिना मातृत्वाद्यभिमानराहित्यरूपोऽर्थो व्यञ्जितो भवति । न हि मातृभूतो जीव सुपुप्तौ मातृत्वरहितो भवति । नशब्द विना तेजस्कायमित्येव तु पाठो दृश्यते । तदा च अपरिणतधर्मभूतज्ञानविशिष्टमित्यर्थ । वस्तुत

भूयस्तेनैव मार्गेण जाग्राय धावति स सम्राडिति होवाच ॥

॥ इति सुबालोपनिषदि चतुर्थः खण्डः ॥

पुन. प्रबोधप्रकारमाह **भूय** इति । **तेनैव मार्गेण** निर्गमनमार्गेण; हिताख्यनाडीमार्गेण । 'तासि प्रत्यवसृप्य पुरीतति शेते' इति श्रुतेः । **सम्राट्** शरीरस्वामिभूत पुरुषः **तेनैव** निर्गमनमार्गेणैव **जाग्राय** जागरणाय **धावति** गच्छति । हृदयस्थानमिति शेष । इति **होवाचेति** आचार्य इति शेषः ॥

इति हरितकुलतिलकवाग्विजयिसूनो श्रीरङ्गराजदिव्याज्ञालब्ध-
वेदव्यासापरनामधेयस्य श्रीसुदर्शनार्यस्य कृतौ
सुबालोपनिषद्विवरणे चतुर्थ खण्ड ॥

ज्ञानस्वरूपमित्येवार्थः । अभिमानाद्यनुपलम्भमात्रेण आत्मनाशो न मन्तव्य इति च अमृतमित्यनेन दर्शितम् । देहाभिमानाभावेऽपि देहसंबन्धो नापेत इति दर्शयितुं सलिल एवेति । 'सलिल एको द्रष्टे'ति च बृहदारण्यके (४.४.३२.) । तेनैव मार्गेणेति । हृदयस्थान-स्थितो जागरस्थानात् स्वप्नस्थानद्वारा सुषुप्तिस्थानं दहरपुण्डरीक-मध्यमागतो यथागतं बहिरायातीत्यर्थः । सम्राडिति । स्वप्नप्रस्तावे संप्रसाद इत्युक्तः आग्रद्भवन् सम्राडित्युच्यते । बृहदारण्यके तु सम्राडिति जनकविषयं संबोधनम् ।

एवं परमात्मविषयकोपासिसिषोपजननाय जीवस्य जागराद्य-वस्थाक्लेशज्ञापनं कृतम् । एवमिह, यादृशनाडीरूपनिबन्धन—तदनु-बन्धिपरस्वन्तर्यामिपरमात्मोपासनमनन्तरखण्डे वक्ष्यते, तादृशी-भिर्नाडीभिर्हितानामिकाभिः देहिना हितं जागरादिभेदेन नानाप्रकारं संभवत् उपवर्णयन् अयं खण्डः उपरितनखण्डशेष इत्यपि ध्येयम् ॥

—:**:—

॥ अथ पञ्चमः खण्डः ॥

स्थानानि स्थानिभ्यो यच्छति । नाडी तेषां निबन्धनम् ।

एवं जाग्रदाद्यवस्थासु दुःखाभिभूतस्य निर्विण्णस्य चेतनस्याप-वर्गार्थम्, समस्तचिदचिदन्तरात्मभूतस्य सर्वस्मात् परस्य निर्दोषस्य *कल्याणगुणाकरस्य परमात्मनः उपासनप्रकारान्* उपदिशति **स्थानानि स्थानिभ्यो यच्छतीति**। वक्ष्यमाणानि चक्षुरादीनि स्थानानि स्थानिभ्यः आदित्यादिभ्यः परमात्मा यच्छति, प्रयच्छति । आदित्यादीनां चक्षुराद्यभिमानित्वं भगवत्संकल्पाधीनमित्यर्थः । "ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात्" इति हि सूत्रकारः । **नाडी तेषां निबन्धनमिति** । नितरां बन्धनम् संबन्धहेतुः । तेषाम्

पूर्वं नाड्यो दर्शिताः । तन्नाडीतदनुबन्ध्यवच्छेदेन परमात्मोपासनमत्रोपदिश्यते । ननु यद्यप्यत्र चतुर्दश पर्यायाः सन्तीति नाड्यः चतुर्दश, न तु दशेति प्रतीयते—अथापि मनसः सर्वेन्द्रियोपकारकतया इन्द्रियान्तरनाड्य एव मनोनाड्योऽपि ; एवं बुद्धिचित्ताहङ्काराणामपि मनसो भिन्नत्वाभावस्य श्रीभाष्ये भाषितत्वात् तदर्थमपि न पृथङ् नाड्य इति स्यात् । अत एव हृदयस्य दशैव छिद्राणि प्राग्युक्तानीति चेत्—अस्तु, किं तेन? वस्तुतो मनोबुद्ध्यादेः विभिन्नोपासनस्थानत्वादिसारस्यात् सन्त्येव उक्तनाडीदशकातिरिक्ताः मनःप्रभृतीनां नाडीविशेषाः । अत एव षष्ठे चतुर्दश नाड्यो नाम्ना निर्देक्ष्यन्ते । अत एव अहङ्कारादिपदमपि मनोभिन्नपरतया भाष्ये व्याख्यास्यते । चित्तं तु सर्वथा मन एव ।

नाडी तेषां निबन्धनमिति प्रतिपर्यायमावर्तते । *तत्र प्रथम*-वाक्ये स्थानानां स्थानिनाञ्च ग्रहणम् । उभयेषामेव पूर्वं निर्देशात् ।

१. चक्षुरध्यात्मं द्रष्टव्यमधिभूतमादित्यस्तत्राधिदैवतम् । नाडी तेषां निबन्धनम् ।

आदित्यादीनां चक्षुरादीनाञ्च शरीरान्तर्गतहृदयकोशस्थेन चेतनेन संबन्धहेतुर्नाडी, आदित्याद्यधिष्ठितं चक्षुरादिकं नाड्या संबद्धम्, नाडी हृदयेन संबद्धा, हृदयमात्मना संबद्धमिति तत्तद्देवताधिष्ठितैश्चक्षुरादिभिरात्मनः संबन्धो नाडीद्वारक इत्यर्थः ।

अथ त्रिविधस्थानसंबन्धिनः परमात्मन उपासनं वक्तुं स्थानत्रैविध्यमाह चक्षुरध्यात्ममित्यादिना । आत्मनि शरीरे वर्तमानं वेदितव्यमध्यात्मम् । भूतेषु पृथिव्यादिषु वर्तमानं वेद्यमधिभूतम् । देवेषु वर्तमानं देवतासु अन्तर्भूतत्वेन वेद्यमधिदैवतम् । चक्षुरध्यात्ममिति । शरीरे वर्तमानं चक्षुः परमात्मन्याधारत्वेनानुसन्धेयम् । द्रष्टव्यमधिभूतमिति । पृथिव्यादिषु वर्तमानं द्रष्टव्यं रूपं तथा वेद्यम् । आदित्यस्तत्राधिदैवतमिति । तत्र द्रष्टव्यगोचरे चक्षुषि अधिष्ठातृत्वेन देवतासु वेद्यं तत्त्वम् आदित्य इत्यर्थः । पूर्वं सामान्येनोक्तं नाडीनां सम्बन्धकत्वमिह दर्शयति । नाडी तेषां निबन्धनमिति । नाडीविशेषा वक्ष्यन्ते । हृदयसंबद्धा नाडी हृदयस्थेन पुरुषेण चक्षुरादित्यद्रष्टव्यानां संबन्धहेतुरित्यर्थः ।

उपरितनेषु तैः सह विषयाणामपि । नाडीविशेषा वक्ष्यन्त इति । षष्ठे खण्डे विरजा, सुदर्शना, जिता, सौम्या, मोघा, कुमारा, अमृता, सत्या, मध्यमा, नासीरा, शिशुः, सूर्या, असुरा, भास्वती इति चतुर्दश नाड्यो वक्ष्यन्ते । नवमेऽपि ताः प्रस्तोष्यन्ते ।

यश्चक्षुषि यो द्रष्टव्ये य आदित्ये यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृदयाकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा ।

तमात्मानमुपासीत, अजरममृतमभयमशोकमनन्तम् ।

एवमुक्ते त्रिविधेऽपि स्थले नाड्यादिषु च परमात्मनोऽवस्थान माह यश्चक्षुषीत्यादिना । सर्वपर्यायेष्वपि **प्राण**शब्दो नवमे वक्ष्यमाण-वायुविशेषपर । **विज्ञाने** एवं तत्तद्देवताधिष्ठिते प्राणाधारे. चक्षुरा-दिभिरिन्द्रियै जन्ये जीवात्मनो विज्ञाने । **आनन्दे** ज्ञानपूर्वकप्रवृत्ति-फलभूते सुखे । अनेन जीवात्मना ज्ञानानन्दयोः चक्षुरादीनां हेतुत्वं परमात्मसंकल्पाधीनमिति दर्शितम् ॥ 'प्रज्ञा च तस्मात् प्रसृता पुराणी', 'एष ह्येवानन्दयाति' इति हि श्रुत्यन्तरम् । **हृदयाकाशे** । नाडीसम्बन्धद्वारेण सर्वेन्द्रियाश्रये हृदि विद्यमानमाकाश सुषिरम् , तस्मिन् । 'तस्यान्ते सुषिर सूक्ष्मम्' इति हि श्रूयते । **एतस्मिन्** इह परिगणिते सर्वस्मिन् वस्तुजाते । तत्रा**ऽन्तरे** अन्तर्भागे । य **सञ्चरति** वर्तते=तिष्ठतीत्यर्थ । सर्वगतस्य परमात्मनो देशात् देशान्तरसयोगरूपसञ्चारासंभवात् । **सोऽयम्** उक्तवैभवविशिष्ट सर्वगतत्वात् सन्निविष्ट **आत्मा** परमात्मेत्यर्थ ; आदित्यादिक्षेत्रज्ञेष्वप्यवस्थानोक्ते । स नारायण इति व्यक्तीभविष्यति । **तम्** उक्ताकार विशिष्टमुपासीत । मुमुक्षुरित्यर्थसिद्धम् , 'ब्रह्मैव सन् ब्रह्मा-प्येति । एतन्निर्वाणमनुशासनम्' इति प्रकरणात् । **अजरममृत**मिति । जरामरणनिषेध सर्वशरीरगतसर्वविकाराभावप्रदर्शनार्थ । **अभयमशोक**-मिति । भावि-भूतहेतुजन्ये दु खे **भयशोकौ** । तन्निषेधो जीवात्मगत-

२. श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। यः श्रोत्रे यः श्रोतव्ये यो दिक्षु यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृदाकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा। तमात्मानमुपासीत, अजरममृतमभयमशोकमनन्तम्।

३. नासाऽध्यात्मं घ्रातव्यमधिभूतं पृथिवी तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। यो नासायां यो घ्रातव्ये यः पृथिव्यां यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृदाकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा। तमात्मानमुपासीत, अजरममृतमभयमशोकमनन्तम्।

४. जिह्वाऽध्यात्मं रसयितव्यमधिभूतं वरुणस्तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। यो जिह्वायां यो रसयितव्ये यो वरुणे यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृदाकाशे य एतस्मिन्

सर्वदोषाभावप्रदर्शनार्थं । एवमचेतनात् बद्धचेतनाच्च व्यावृत्ति । अनन्तम् देशकालवस्तुभिः परिच्छेदरहितम् । अनेन मुक्तात् व्यावृत्ति । एवं चिदचिदात्मकतत्त्वद्विमूर्तिविशिष्टं विश्वचिदचिद्विलक्षणं परमात्मानं नारायणमुपासीतेत्यर्थः ।

श्रोत्रमध्यात्ममित्यादयः पर्याया सर्वे प्रथमपर्यायविवरणेन प्रायशो व्याख्याताः । श्रोतव्यः शब्दजातम् । दिश इति दिगभिमानि देवता विवक्षिता ।

नासेति घ्राणेन्द्रियं विवक्षितम् इन्द्रियप्रकरणत्वात् । घ्रातव्यो गन्धः । पृथिवीशब्दो देवतापरः ।

जिह्वाशब्दो रसनेन्द्रियपरः । रसयितव्यः माधुर्यादिरसः ।

सर्वेस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा। तमात्मानमुपासीत, अजरममृतमभयमशोकमनन्तम्।

५. त्वगध्यात्मं स्पर्शयितव्यमधिभूतं वायुस्तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। यस्त्वचि यः स्पर्शयितव्ये यो वायौ यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वेस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम्।

६. मनोऽध्यात्मं मन्तव्यमधिभूतं चन्द्रस्तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। यो मनसि यो मन्तव्ये यश्चन्द्रे यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वेस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा। तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम्।

त्वक् स्पर्शनेन्द्रियम्। स्पर्शयितव्यम् स्पर्शविशेषः। वायुः देवता।

ननु मन्तव्यमधिभूतमिति कथमुच्यते मनश्चन्द्रप्रभृतयो विहित (प्रभृतयोऽपि हि ?) मन्तव्यकोटिनिविष्टा। ततश्चाध्यात्माधिभूतादिविभागो न स्यादिति-उच्यते। यत्राध्यात्माधिभूतादिसङ्कर, तत्र मन-

---

ननु मनसोऽध्यात्मं गणितस्य, चन्द्रस्य चाधिदैवतं गणितस्यापि मन्तव्यत्वात् मन्तव्यं सर्वं कथमधिभूतमिति गण्येत इति शङ्कते ननु मन्तव्येति। न मन्तव्यं सर्वमधिभूतमिति विवक्षितम्, किन्तु अध्यात्ममधिदेवतश्चोक्तादन्यस्य भूतान्तर्गतत्वात् प्रायोवादोऽयमित्याशयेन समाधत्ते उच्यत इति। तुलायामिति। तुलायां=घटे अधिकद्रव्यतोलनापेक्षी प्रथमतः फलादिना इष्टकादि समगौरवं परिमाय, तत् इष्टकादि फलादिना सहैकत्र फलके निक्षिप्य फलकान्तरे निर्णेयद्रव्यं निक्षिप्य तोलयति। तत्रेष्टकादि पूर्वं प्रमेयं भवत् पश्चात् प्रमाणमपि भवति। तथेत्यर्थः। तदुक्तं न्यायसूत्रे, 'प्रमेयता च तुलाप्रामाण्यवत्' इति। अवश्यञ्च मन्तव्यशब्दार्थे संकोचः कार्यः।

७. बुद्धिरध्यात्मं बोद्धव्यमधिभूतं ब्रह्मा तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। यो बुद्धौ यो बोद्धव्ये यो ब्रह्मणि यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृदयाकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा। तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम्।

प्रकृतिपदार्थव्यतिरिक्तविषयत्वेन मन्तव्यादिशब्दाः संकोचयितव्याः। यद्वा तुलायां प्रमाणभावप्रमेयभाववत् मनश्चन्द्रादीनामेव आकारभेदेनोभयकोटिनिविष्टत्वव्यवहार उपपन्न इति मनः शरीरान्तर्वृत्तित्ववेषेणाध्यात्मं भवतु; विचार्यत्ववेषेण मन्तव्यञ्च भवतु। अधिभूतशब्दोऽपि भूतपरिणामे शरीरे अवस्थितत्वादुपपन्नः। देवतारूपस्य चन्द्रादेरपि मन्तव्यत्वमविरुद्धम्, विचार्य निर्णेतव्यत्वात्। आकाशवर्तित्वादधिभूतत्वञ्चाविरुद्धम्। सर्वेश्वरस्य तु मन्तव्यत्वेऽपि समाभ्यधिकराहित्येन अन्याधिष्ठेयत्वाभावात् मन्तव्यशब्दः चन्द्रादे (?) अर्वाचीनेषु संकोचनीयः। एवं सर्वपर्यायेषु सङ्कीर्णव्यवहारपरिहारो द्रष्टव्यः।

बुद्धिः व्यवसायवृत्तिर्मनसोऽनुग्राहकं महत्तत्त्वम्। बोद्धव्य निश्चेतव्यं रूपादि। महत्तत्त्वनाशादिनाऽपि (दीनामपि?) बोद्धव्यत्वादिविरोधः पूर्ववदनुसंधेयः। ब्रह्मणि चतुर्मुखे।

'श्रोतव्यो मन्तव्यः' इति श्रुतस्य परमात्मन इह तदर्थतया प्रमाणत्वात्। तस्याप्यत्र तेन पदेन ग्रहणे न केवलमधिभूतमित्येतावत्स्वभावम्, 'यो मन्तव्ये' इत्युपरितनवाक्योक्ता तस्मिन् परमात्मनः स्थितिरपि न घटेत। अतः संकोचनीयोऽयं चन्द्रादिलोऽपि संकोच्यतामित्याह सर्वेश्वरस्येति।

८. अहङ्कारोऽध्यात्ममहङ्कर्तव्यमधिभूतं रुद्रस्तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। योऽहङ्कारे योऽहङ्कर्तव्ये यो रुद्रे यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा। तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम्।

९. चित्तमध्यात्मं चेतयितव्यमधिभूतं क्षेत्रज्ञस्तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। यश्चित्ते यश्चेतयितव्ये यः क्षेत्रज्ञे यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्व-

---

अहंकारः अनात्मनि आत्माभिमानवृत्तिर्मनसोऽनुग्राहकं महत्कार्यं तत्त्वम्। **अहङ्कर्तव्यमधिभूतम्।** मूलपरिणामे देहे वर्तमानः जीवात्मैव स्थूलोऽहमित्यभिमानविषयत्वादहंकर्तव्यशब्दार्थः। तत्र सविषयेऽहंकारे रुद्रोऽधिदैवतम्। महदभिमानी चतुर्मुखपुत्रो रुद्रो महत्कार्यस्याहङ्कारस्याधिदैवतमित्युपपन्नम्। अत एव हि दीक्षिते स्वस्मिन् ब्राह्मणस्वाभिमानेन रुद्रतनुरित्युच्यते।

चिन्तावृत्तिमत् मन एव हि **चित्तम्।** चिन्ता च स्मरणं वा अपेक्षितवुभुत्सा वा। 'एवं सञ्चिन्तयन् विष्णुम्', 'मानसं विष्णुचिन्तनम्' 'चिन्तयन्ती जगत्सूतिम्', 'चिन्तयामास कोन्वेतत् प्रयुञ्जीयादिति प्रभुः', 'तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः' इत्यादिप्रयोगदर्शनात्। **क्षेत्रज्ञो** जीवात्मा स्वयमेव। यद्वा, 'क्षेत्राणि च शरीराणि बीजानि च शुभाशुभे। तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते' इत्युक्तोऽन्तरात्मा वा। **यः क्षेत्रज्ञे—सञ्चरतीत्यत्र, क्षेत्रज्ञशब्दस्य** परमात्मवाचित्वे, स्वस्मिन्नवस्थित इति स्वमहिमप्रतिष्ठितत्वमुक्तं भवति।

स्मिन्नन्तरे सञ्चरति, सोऽयमात्मा । तमात्मानमुपासीताजरममृतम-भयमशोकमनन्तम् ।

१०. वागध्यात्मं वक्तव्यमधिभूतमग्निस्तत्राधिदैवतम्; नाडी तेषां निबन्धनम्; यो वाचि यो वक्तव्ये योऽग्नौ यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा । तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ।

११. हस्तावध्यात्ममादातव्यमधिभूतमिन्द्रस्तत्राधिदैवतम्; नाडी तेषां निबन्धनम्। यो हस्ते य आदातव्ये य इन्द्रे यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ।

१२. पादावध्यात्मं गन्तव्यमधिभूतं विष्णुस्तत्राधिदैवतम् । नाडी तेषां निबन्धनम् । यः पादे यो गन्तव्ये यो विष्णौ यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्न-

---

वक्तव्यं शब्दः । अग्निः देवता ।

विष्णुः उपेन्द्र । त्रिविक्रमत्वात् पादेन्द्रियाद्यधिष्ठातृत्वं तस्य । 'यद्विष्णुक्रमान् क्रमते', 'विष्णोः क्रमोऽस्यभिमातिहा' इत्यादिश्रुतेः । विष्णौ...सञ्चरतीति । विष्णुशब्दः इन्द्रानुजत्वेनावतीर्णविग्रहपरः । यःसञ्चरतीति यच्छब्दस्य नारायणपरत्वात् यो विष्णाविति वैयधि-करण्यनिर्देशात्; रूपमस्य शुक्लं इति न्यायेन असमानविभक्तिनिर्देशे सति विशिष्टवाचिशब्दस्यापि विशेषणमात्रपरत्वोपपत्तेश्च । विष्णुशब्द-स्यापि विग्रहविशिष्टभगवद्वाचित्वे पूर्ववत् स्वमहिमप्रतिष्ठत्वमर्थः । चतु-र्मुखादीनां तु अवतारूपत्वश्रवणाभावात् स्वमहिमप्रतिष्ठितत्व तत्रानुप-पन्नम् । "सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते", "तवान्तरात्मा

न्तरे सञ्चरति सोऽयमात्मा । तमात्मानमुपासीताजरममृतमभय-मशोकमनन्तम् ।

१३. पायुरध्यात्मं विसर्जयितव्यमधिभूतं मृत्युस्तत्राधिदैवतम् ; नाडी तेषां निबन्धनम् । यः पायौ यो विसर्जयितव्ये यो मृत्यौ यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा । तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ।

१४. उपस्थोऽध्यात्ममानन्दयितव्यमधिभूतं प्रजापतिस्तत्राधिदैवतम् ; नाडी तेषां निबन्धनम् । य उपस्थे य आनन्दयितव्ये यः प्रजापतौ यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य एतस्मिन् सर्वस्मिन्नन्तरे सञ्चरति, सोऽयमात्मा । तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ।

एष सर्वज्ञ एष सर्वेश्वर एष सर्वाधिपतिरेषोऽन्तर्याम्येष योनिः

मम च ये चान्ये देहिसंज्ञिता." इति सात्त्विकोपबृंहणेषु चतुर्मुखादीनां भगवदनुप्रविष्टत्वदर्शनाच्च ।

आनन्दयितव्यमिति स्त्रीपुंसशरीरस्थ आत्मा विवक्षितः । अत्र **प्रजापतिशब्दः** चतुर्मुखव्यतिरिक्तविषय । 'त्वं रुद्रस्त्वं ब्रह्मा त्वं प्रजापति' इति पृथगुपदेशदर्शनात् , चतुर्मुखस्य महत्तत्त्वाधिष्ठातृत्व प्रतिपादनादर्थान्तरे संभवति तस्यैव पुन प्रतिपादनपरत्वकल्पनायोगाच्च ।

एवं समस्तचिदचिद्वस्तुष्ववस्थितस्य भगवतो व्याप्ते घटादावाकाशव्याप्तिसाम्यव्यवच्छेदार्थम् अन्यत्रासमानितान् मङ्गलगुणविशेषानाह **एष सर्वज्ञ** इति । व्याप्यसर्ववस्तुसाक्षात्कर्तेत्यर्थ । **सर्वेश्वरः** साक्षात्कृतस्य सर्वस्य नियन्ता । **एषः सर्वाधिपतिः** नियाम्यस्य स्वामी ।

सर्वस्य । सर्वैसौख्यैरुपास्यमान न च सर्वसौख्यान् उ(न्यु)पास्यति । वेदशास्त्रैरुपास्यमान न च वेदशास्त्राण्युपास्यति । यस्यान्नमिद सर्वम् न च योऽन्न भवति ।

न केवल रक्षकत्वमात्रमधिपतिशब्दार्थ , मातापितृसरक्ष्यस्य पुत्रस्य तत्पतिकत्व यवहाराभावात् । जगच्छरीरकत्वसिध्यर्थ ईश्वरशब्दोक्त नियमनमन्त प्रवेशपूर्वकमिति दर्शयति **एषोऽन्तर्यामीति** । एष **योनिः** सर्वचिदचिच्छरीरकत्वात् तस्योपादानमित्यर्थ । **सर्वसौख्यैः** नानाविधसौख्योपेतैर्देवादिभिरित्यर्थ । **वेदशास्त्रैरिति** । वेदशास्त्राणा भगवदुपासने प्रमाणतया करणत्व विवक्षितम् । **वेदशास्त्राणीति** । *वशास्त्रवश्य इत्यर्थ । अन्नम् अदनीयम् , सहार्यमित्यर्थ ।*

तत्पतिकत्वेति । न हि पुत्र प्रति पितुर्मातुश्च पतित्वेन व्यवहार इति । श्रुतप्रकाशिकाया तु, 'वृद्धौ च मातापितरौ साध्वी भार्या सुत शिशु । अप्यकार्यशत कृत्वा भर्तव्या मनुरब्रवीत्' इति मातापितरौ प्रति पतित्वव्यवहारप्रसङ्ग इत्युक्तम् ।

सर्वसौख्यैरित्यत्र बहुव्रीह्युदाहरणम् , उपरि, 'सर्वसौख्यानुपास्यति' इति पाठाभिप्रायेण । 'सर्वसौख्यान्युपास्यति' इति पाठे तु इहापि कर्मधारय एव । सौख्यैरुपास्यमानत्व नाम स्वयमेव सौख्यैरस्य व्रियमाणत्वम् । सौख्याना सौख्यत्व तदधीनम् । सौख्यभागितया पुसामतिशयोऽन्यत्र । परमात्मविषये तु सौख्यानामपि त सम्बन्धादतिशय । अद्भुतानन्दरूपत सम्बन्धात् गुणभूतानामानन्दानामतिशयो भवति । यदाहु —

'गुणत्वयत्त लोके गुणिषु नियत (हिमत) मङ्गलपद
विपर्यस्त हस्तिक्षितिधरपते तत् त्वयि पुन ।

अतः परं सर्वनयनः प्रशास्ता अन्नमयो भूतात्मा प्राणमय

अतः परमिति । भूयोऽपि तन्माहात्म्यमुच्यते इत्यर्थः । यद्वा **अतः** उक्तगुणकत्वात् *परः* केवलं *स एव सर्वस्मादधिक* इति वक्ष्यमाण गुणैरन्वयः । **सर्वनयनः** सर्वकार्याणां नेता = निर्वोढा । **प्रशास्ता** प्रशासितृत्वेन निर्वोढा । न तु राजनियुक्तपुरुषवत् प्रशासनीयत्वेन निर्वोढेत्यर्थः । **तमात्मान**मित्यात्मशब्दनिर्दिष्टस्य परमात्मनः सर्वान्तरात्मत्वेन आत्मत्वकाष्ठां प्रतिपादयति **अन्नमय** इत्यादिना ॥ भूतपरिणमरूपदेहोऽ**न्नमयः** । स च सर्वेश्वर इत्यर्थः । **भूतात्मा** भूतानां शरीरकारणभूतानामपि आत्मा । **अन्नमया**दिशब्दानां परमात्मसामानाधिकरण्यमात्मशब्दस्वारस्यादवगम्यते । न च मृदात्मको घट इतिवत्

गुणाः सत्यज्ञानप्रभृतय उत त्वद्गततया
शुभीभूयं याता इति हि निरणैष्म श्रुतिवशात् ॥'

इति । *अत एव नवनीतचौर्यादीनामपि भगवत्कृष्णसंबन्धात् यथा*वन्मोक्षहेतुता ।

उपास्यतीत्येतत् उपास्त इत्यर्थे छान्दसम् । 'असु क्षेपे' इति धातुर्वा । नोपास्यति नोपक्षिपति ; न स्वयं स्वसंनिधिं प्रति आनयतीति । *सर्वमिदमनायासप्राप्तसर्वसौख्य* इत्यर्थाभिप्रायम् , न तु *तत्संकल्पाभावेऽपि तस्य तानि भवन्तीत्यर्थकम्* , 'इच्छात एव तव निश्वपदार्थसत्ता' इत्येतद्विरोधात् ।

अतः परमिति । 'ततो यदुत्तरतरम्' इति श्वेताश्वतरोपनिषदीव इह अत्र पदं व्याख्येयमिति भाव. । परशब्दस्य उत्कृष्टार्थकत्वे सर्वनयन इत्यादिपुलिङ्गानुरोधेन परः इत्येव श्रूयेत । अतोऽपि अतइति पदमेव नावधिसमर्पकमिति ध्येयम् । शरीरकारणभूतानामिति । प्राणमय इन्द्रियात्मेत्यादौ प्राणाधीनस्थितिप्रवृत्तिकेन्द्रियादिग्रहणवत्

<u>इन्द्रियात्मा मनोमयः संकल्पात्मा विज्ञानमयः कालात्मा आनन्द-</u>

आत्मशब्दः स्वरूपमात्रपरः । **प्राणमय इन्द्रियात्मेत्यनेनैकरीत्यात्** । न हि प्राणापानादिपञ्चवृत्तिप्राण इन्द्रियस्वरूपः । **प्राणमयः** मुख्यप्राणशरीरकश्च स **इन्द्रियात्मा** प्राणबद्धानामपीन्द्रियाणामात्मा । **मनोमयः** मनःप्रभृतिप्रधानपर्यन्ततत्त्वशरीरक इत्यर्थः । 'भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् । आत्मा च परमात्मा च त्वमेकः पञ्चधा स्मृतः' इति श्रीविष्णुपुराणवचनोपबृंहितत्वात् । *सङ्कल्पात्मा* । सङ्कल्पशब्दो मनोवृत्तिजन्यज्ञानानां प्रदर्शनार्थः । 'कामः सङ्कल्पो विचिकित्सा श्रद्धा धृतिरधृतिः ह्रीर्धीर्भीरित्येतत् सर्वं मन एव' इति श्रुतानां मनोमूलानां कामसङ्कल्पादीनाम् आत्मा सत्ताहेतुः **विज्ञानमयः** जीवात्मशरीरकश्च सः । **कालात्मा** आदित्यादिक्षेत्रज्ञ-

---

स्वस्यापि देहाधीनस्थितिप्रवृत्तिकभूतविशेषग्रहणं युक्तं चेत्, भाष्यमिदं तदनुरोधेन नेयम् ।

ननु अन्नमयादिशब्दाः तैत्तिरीय इव देहादिमात्रपराः । तेषाञ्च यथाक्रमं भूतादिनिग्राहकत्वादात्मत्वं विमृश्यम् । अन्नरसमयस्य देहस्यानेकप्राण्युत्पत्तिहेतुत्वात् अनेकप्राणिसेव्यत्वात् पाञ्चभौतिकस्य सर्वस्य देहोपचयाद्यर्थतया देहशेषिकत्वाच्च भूतात्मत्वं देहस्य । विज्ञानमयस्य च कालात्मत्वं भूतभविष्यदादिविविधकालसङ्ग्रानस्य विज्ञानैकनिरूप्यत्वात् इत्यत्राह—अन्नमयादिशब्दानामिति । तैत्तिरीयेऽपि, 'तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा' इत्यादौ अन्नमयादिपदस्य देहादिमात्रपरत्वेऽपि 'एतमन्नमयमात्मानमुपसंक्रम्य' इत्यादौ विशिष्टपरमात्मपरत्वमेवेति ध्येयम्। आत्मशब्दस्वारस्यादिति। सर्वं नयतः प्रशास्तेत्येतत्सामानाधिकरण्यादेवान्नमयादिपदानां परमा-

मयो लयात्मा ।

शरीरत्रया अहोरात्रादिकालचक्रनिर्वाहक । यद्वा आकलनस्य वा आकलयितृणां वा सर्वेषामात्मा निर्वाहक । अन्तर्यामित्वेन स्थितो जीवानामर्थपरिच्छेदसामर्थ्यमापादयतीति यावत् । **आनन्दमय** इत्ये तदुपपादयति **लयात्मेति** ॥ लयस्यात्मा । आत्यन्तिकप्रलयरूपस्य मोक्षस्य आत्मा सत्ताहेतु , निर्वाहक । मोक्षप्रदत्वादिलक्षणादैश्वर्य प्रकर्षात् निरतिशयानन्दप्रचुर परमात्मेत्यर्थ । तैत्तरीयोपनिषदि हि 'अन्योऽन्तर आत्माऽऽनन्दमय' इति आनन्दमय प्रस्तुत्य, 'यतो वाचो निवर्तन्ते' इत्यन्तेनास्य निरतिशयानन्दयोगमुपपादयत् वाक्यजातम्, 'सोऽकामयत बहु स्या प्रजायेय', 'तदनुप्रविश्य—विज्ञानश्चाविज्ञानश्च', 'एष ह्येवानन्दयाति', 'भीषाऽस्माद्वात पवते' इति जगत्कारणत्व-चिदचिदन्तरात्मत्व - कृत्स्नप्रशासितृत्ववत् अनन्यसाधारण्येन(णेन ?) *आनन्दयितृत्वेनापि निरतिशयानन्दयोगित्वमुपपादयति ।*

त्मपरत्व सिद्धम् । यदि देहादिमात्रपरत्वप्रत्याशया प्रशास्तेत्यनेनैक-वाक्यत्वत्यागो मन्यते, तदाऽपि भूतात्मेत्यादिगत आत्मशब्द एव ता प्रत्याशा प्रतिरुणद्धीति भाव । भूतात्मेति । ग्राह्यात्मा ग्राहकात्मा ग्राह्यग्राहकरूपप्रपञ्चकारणप्रधानात्मा ग्रहीतृजीवात्मा ग्राहयितृहर्षी केशरूपश्च तत्राऽऽत्मा दर्शित इति प्रतीयते ।

आनन्दमयो लयात्मेति । प्रलयादौ पूर्वकर्मापादितान्यादृशाल्या जीवा स्वयमेव परमानन्दात्मनि परमात्मनि लयार्थं मोक्षे प्रयतन्ते । ईदृशलयनिर्वाहकत्वात् स स्वयमानन्दमय इति ज्ञायते । अनानन्दम यत्वे ह्यपुरुषार्थत्वात् तत्र लय न कश्चित् काङ्क्षेत् । किंतु अत्यन्तविलय विना पीन पुन्येन सुखी यावल्लाभमानन्दमनुभूय प्रादुर्भावपर एव

ननु चक्षुरध्यात्ममित्यादिपर्यायेषु, 'यः प्राणे यो विज्ञाने य आनन्दे' इति जीवधर्मस्याऽऽनन्दस्य प्रकृतत्वात् तस्येह प्रत्यभिज्ञानात् तद्विकार उक्तोऽयमानन्दमय , न तु परमात्मा । आनन्दप्रकर्षस्य चित्तप्रलयरूपस्तैमित्यहेतुत्वात् लयात्मकत्वञ्चोपपन्नमिति चेत् --नैतदुपपद्यते । 'तमात्मानमुपासीत', 'एष सर्वज्ञ एष सर्वेश्वर एष सर्वाधिपतिः' इत्यादिना आत्मत्वेन प्रतिपादितस्य सर्वेश्वरस्य आत्मशब्देनैव भूतेन्द्रियादीनामन्तरात्मतयाऽभिहितस्य जीवानन्दविकारत्वायोगात् । तैत्तरीयोपनिषदि, 'एष ह्येवानन्दयाति' इति जीवानन्दयितृत्वेनोक्तस्य आनन्दमयस्येह प्रत्यभिज्ञानात् । इहापि, 'य आनन्दे .... सञ्चरति' इति जीवानन्दस्य तदधीनत्वावगमात् । अत एवानन्द [मय!] स्य स्वानन्दयितव्यजीवधर्मविकारत्वायोगात् , तत्र च 'एतमानन्दमयमात्मानमुपसंका-

---

स्यादिति भावः । ऐश्वर्यप्रकर्षात् निरतिशयानन्दप्रचुर इति । 'युवा स्यात् साधु युवाध्यायकः—स एको मानुष आनन्दः' इति श्रवणात् अस्मन्मते अनुकूलानां सर्वेषामानन्दशब्दवाच्यत्वात् आनन्दमयवल्लीगतं जगत्कारणत्वाद्यनेकविशेषपरं वाक्यं सर्वमपि तस्याऽऽनन्दमयस्य आनन्दांशानां निरूपकमेवेति भावः ।

(अतः परमित्यादेरेयमप्यर्थः स्यात्—उक्तरीत्या ग्राह्यग्राहकतदभिमानिदेवता-ग्रहणकर्तृजीवाद्यन्तर्यामिभूतस्य परमात्मन उपासनायां कृतायाम्, अतःपरम् उपासनानन्तरं ग्राह्यग्राहकादिरूपान्नमय - प्राणमय - विज्ञानमयक्रमेण आनन्दमये स्वात्मनि लयरूपस्य मोक्षस्य निर्वाहको भवति स परमात्मेति । एवञ्च एकत्वं नास्तीत्याद्युपरितनवाक्यं मोक्षदशायाः किञ्चिद्रूपेण वैचित्र्यप्रदर्शनप्रवृत्तमिति ।

मति' इत्यान दमयस्य प्राप्यत्वोक्त्या तत प्राप्यान्तरानुक्त्या च परम प्राप्यस्य तस्यैवाऽऽनन्दमयशब्देन प्रत्यभिज्ञानादात्यन्तिकप्रलयरूपमोक्ष निर्वाहकत्वस्यैव लयात्मशब्देन वक्तु योग्यत्वात् । अस्यामेवोपनिषदि, (९ ख) 'य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्त निर्बीजमेवाप्येति' इति जीवानन्दस्य तुरीया दर्वाचीनत्वेन वक्ष्यमाणत्वात् तुरीयस्य [तुरीयातीतस्य ?] परमप्राप्यतया वक्ष्यमाणत्वाच्च परमप्राप्यतया श्रुतिसिद्धस्यानन्दयस्य तुरीयातीतत्वेन तुरीयादर्वाचीनक्षुद्रानन्दविकारत्वानुपपत्तेश्च । एव व्याप्यत्व-निर्वाह्यत्व-तुरीयानतीतत्व-क्षुद्रत्वै आत्मत्वनिर्वाहकत्वपरमप्राप्यत्वतुरीयातीतत्वैश्च विरुद्धस्वभावत्वात् पूर्वापरवाक्यस्थानन्दानन्दमयशब्दौ चातिदूर भिन्नार्थौ । न च जीवानन्दशरीरक परमात्मेति वाच्यम्-'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्द ब्रह्मणो विद्वान्' इति वाङ्मनसागोचरस्य ब्रह्मसम्बन्धित्वश्रवणात्, जीवानन्दस्य स्वसम्बन्धित्वेन सर्वप्राणिमनस्संवेद्यत्वाच्च भिन्नार्थयोरपि (रत्नापि ?) पूर्वापरवाक्ययोरिव आनन्दानन्दमयशब्दयोर्भिन्नार्थत्व युक्तम् । तस्मात् आनन्दमयो लयात्मेति वाक्यस्य यथोक्त एवार्थ ।

एव सर्वान्तरस्यानन्दमयशब्दवाच्यस्य सर्वेश्वरस्य लयात्मत्व प्रसङ्गेन जगदप्ययस्थानभूतस्य तस्य चिदचिद्विलक्षणत्वानुपपत्तिम् तद्गत

ननु परमात्मन चिदचिद्वैलक्षण्यस्य तृतीयखण्ड एव व्युत्पादितत्वादत्र पुन किमिति तद्वचनमित्यत्राह लयात्मत्वप्रसङ्गेनेति । प्रासङ्गिकमत्रैतत्कथनमिति भाव ।

एकत्वं नास्ति, द्वैतं कुतः ?

विकारादिहेयसस्पर्शनञ्च आशङ्क्य परिहरति एकत्वं नास्ति द्वैतं कुत इति। सर्वजगदुपादानस्य सर्वाप्ययस्थानस्यापि सर्वेश्वरस्य प्रकृतिपुरुषाभ्यां स्वरूपैक्यं नास्ति। तस्य द्वैतं कुतः। चिदचिद्गतभेदान्वय कुतः। महदहङ्कारादिकार्यभेदो जन्मजराद्यवस्थाभेदो देवमनुष्यादिजातिभेदः शुक्लकृष्णादिगुणभेद गमनागमनादिक्रियाभेद खुरपुच्छश्रृङ्गाद्यवयवभेद इति अचिद्गत सर्वविध बाह्य द्वैतम्, सुखदुःखमोहरागद्वेषलोभभयशोकमदमानमत्सरादिकमान्तर चिद्गत द्वैतमपि सर्वेश्वरे न प्रसङ्गमर्हतीत्यर्थ।

ननु एकत्वं नास्तीत्यादिपर्यालोचने शून्यवाद एव श्रुतितात्पर्यमवसीयते। तथा हि—न तावदिदमेकत्वं निषिध्यमानं स्वसजातीयरहितत्वरूपम्। सिद्धान्ते तादृशपरमात्मसद्भावेन तन्निषेधायोगात्। तथा श्रुत्यर्थवर्णने द्वैतं कुत इत्येतदसंगतेश्च। सजातीयद्वितीयसद्भावे द्वैतनिषेधायोगात्। एवञ्च संख्यारूपमेव निषेध्यम्। तच्च धर्मिणि सति निषेद्धुमशक्यमिति धर्मिनिषेध एव पर्यवसानम्। एवमेकस्यैवाभावे द्व्यादेः का प्रसक्तिरिति द्वैतं कुत इत्युच्यते। मर्त्यं नास्ति इत्यादिकमपि तत्तन्निषेधपरं सत् सर्वशून्यत्वमेव ख्यापयति। न भवतीत्यनुक्त्वा नास्तीति प्रयोगः अत्यन्ताभावं द्योतयति; न तु भेदम्। एवञ्चोपक्रमे, न सन्नासन्न सदसत् इतीदमपि सदादिसर्वनिषेधपरमेव। तृतीयखण्डारम्भे असदित्येतदपि अभावार्थकमेव; तथा प्राचां व्यवहारदर्शनात्। अत एव निर्वाणमनुशासनमिति निर्वाणपदमपि साधु संगच्छते। निर्वाणो दीप इत्यादाविव निर्वाणं ह्यभाव एव। स एवानुशास्यमान इति तदर्थः। अतः शून्यवाद एव सुबालश्रुत्यर्थः किं न स्यादितीदृशीमाशङ्कामुपक्षिपति नन्वित्यादिना।

नन्वेकत्वसंख्याऽपि नास्ति। कुतः सजातीयविजातीयभेद इति अर्थ इति न वाच्यम्-"एष सर्वज्ञ एष सर्वेश्वर" इत्यादिभिः ज्ञानैश्वर्यादि-गुणानां प्रमाणान्तराप्रतिपन्नानाम्, कृत्स्नस्य जगतः तद्विभूतित्वस्य च विहितत्वात्। विहितस्य च निषेधायोगात्। अनेकवाक्यप्रतिपन्नस्य एकवाक्येन बाधायोगात्। प्रथमवाक्यावगतस्य च चरमवाक्येन बाधा-

---

नन्विति प्रश्नद्योतकम्। अर्थ इत्यन्तेन प्रश्नसमाप्तिः। इति न वाच्यमिति तत्खण्डनम्। ननु विहितस्य निषेधायोगादिति कथम्? एकस्मिन् काले स्थितस्य कालान्तरे निषेधरूपशून्यवादे दोषाभावात्। सर्वज्ञ इत्यादिना प्रस्तुतस्यैव अतः परमित्यादिनाऽनुवादपूर्वकं पश्चात्काले लयात्मेति लयो वर्ण्यते,इत्यस्तु इत्यत्राह अनेकेत्यादि। छान्दोग्ये, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम्; तस्मादसतः सज्जायत इति। कुतस्तु खलु सोम्यैवं स्यादिति होवाच' इत्येवं कालविशेषे शून्यमात्रपरिशेष इति वादस्यापि खण्डनेन सद्रूपवस्तुसद्भावस्य प्रलयेऽपि स्थापनेन सत्कार्यवाददर्शनात् एवम्भूतनानाश्रुतिसिद्धार्थबाधेन शून्यवादस्य श्रुत्यर्थत्ववर्णनायोगात्। एवं शून्यवादेऽपि अभावोऽस्ति, न वा। नास्ति चेत्, सतः सद्भाव इष्टो भवति। अभावोऽस्ति चेत्, स एकोऽनेको वा। अभावे संख्या न भवतीति चेत्—तत् अनुभव-विरुद्धम्। अस्ति चेत्, एकत्वं नास्ति द्वैतं कुत इत्यादिकमनुप-पन्नमित्यादिकमपीह भाव्यम्।

विहितस्य च निषेधायोगादिति। द्वैतं कुत इति वाक्यं न सर्वज्ञत्वादिरूपद्वैतनिषेधकम्। तथा सति विधायकवाक्यस्यासत्यार्थ-प्रतिपादकतया अप्रामाण्यापत्तेः। एवमप्रामाणिकार्थप्रतियोगिका-भावस्य पारमार्थिकताया दुर्वचतया स्वयमप्यप्रमाणत्वापत्तेः। विहि-

मर्त्यं नास्ति, अमृतं कुतः?

योगात् । गुणविशेषविधानस्य सामान्यशब्देन बाधायोगात् । विशेषनिषेधे सामान्यनिषेधसङ्कोचस्य युक्तत्वाच्च । अतो यथोक्त एवार्थः ।

मर्त्यं नास्ति अमृतं कुत इति । मर्त्यत्वं नास्ति, अमृतत्वं कुतः । प्रसङ्गे सति हि प्रतिषेधः । मर्त्यत्वमिति सांसारिकस्वभावानामु-

---

तायाः क्रियाया निषेधे विकल्पेन वाक्यद्वयस्य प्रामाण्यम् । वस्तुनि विकल्पायोगात्तु एकतरस्याप्रामाण्यं दुर्वारम् ॥ यदा यत्र यद्विधिः, तदा तत्र तन्निषेधायोगेऽपि देशान्तरे कालान्तरे च तन्निषेधो न दोषायेति चेत्—तर्हि देशकालविशेषस्वीकारात् कथमेकत्वस्य द्वैतस्य वा निषेधः? कथञ्च सर्वशून्यवादः? नित्यञ्च सर्वशत्वादिकं न कदापि तदधिकरण एव निषेद्धुं शक्यम् । युक्त्यन्तरमाह अनेकेति । यद्यप्येकप्रमाणवाक्यप्रतिपन्नमप्यशक्यनिषेधम् , तथापि अनेकवाक्यप्रतिपन्नतया भूयसान्न्यायेन विधिरेव बलीयानिति भावः । असञ्जातविरोधत्वादुपक्रमप्राबल्यादप्येवमित्याह प्रथमेति । सामान्यनिषेधस्य विहितव्यतिरिक्तविषयत्वस्यैव युक्तत्वादपि न विहितविशेषनिषेध इत्याह गुणविशेषेति । विशेषनिषेधे सामान्यनिषेधस्य पर्यवसानादप्येवमित्याह विशेषनिषेध इति। न च विधिस्थल एव छागपशुन्यायेन सामान्यविशेषपरता , न निषेधस्थल इति वाच्यम्—तत्रापि, 'वार्ताकं न भक्षयेत्,' 'श्वेतवार्ताकं न भक्षयेत्' इत्यत्र विशेषनिषेधपर्यवसानस्य पूर्वमीमांसकोक्ततया संप्रतिपन्नत्वात्। निषेधस्य प्रतियोग्यनुयोगिसापेक्षतया द्वैतसिद्धौ सर्वथा द्वैतनिषेधायोगात् विशेषजिज्ञासाया विशेषनिषेधस्योपजीव्यत्वात् । लोकेऽपि तथा तात्पर्येण बहुलप्रयोगदर्शनाच्च ।

ननु एकत्वं नास्तीत्यादेः, आनन्दमये लयं प्राप्तस्य जीवस्य

नान्तःप्रज्ञो नबहिःप्रज्ञो नोभयतःप्रज्ञो नप्रज्ञानघनो नप्रज्ञो

पलक्षणम् । संसारित्वप्रसङ्गाभावात् परमात्मनो जीवात्मन इव तद्विनाश-रूपममृतत्वं नास्तीत्यर्थः ।

एवं चिदचिद्वैलक्षण्यमुक्त्वा कल्याणगुणेषु प्रथमप्रतिपादितं सार्वज्ञ्यमादरातिशयात् प्रपञ्चयति **नान्तःप्रज्ञ** इत्यादिना । अन्तरेव प्रज्ञा यस्य सोऽन्तःप्रज्ञः । अब्भक्ष इतिवत् अवधारणगर्भोऽयं निर्देशः । **नान्तःप्रज्ञः** । बाह्यमपि जानातीत्यर्थः । **न बहिःप्रज्ञः** । न बहिरेव जानाति, अपित्वन्तरपि जानातीत्यर्थः । कूपकच्छपः कूपाद्बहिर्न वेत्ति । भूतलस्थ. पुरुषः कूपान्तर्गतं न जानाति । सर्वेश्वरस्तु नैवम् ; 'अपितु सर्वपदार्थानामन्तर्बहिश्च जानातीत्यर्थः । **नोभयतःप्रज्ञः** । यद्यपि परिच्छिन्नरूपाद्यपेक्षया अन्तर्गतब(अन्तर्ब?)हिर्भागौ विद्येते, तथापि परमात्मन सर्वगतत्वात् बहिर्भागो नास्ति ; तदभावात् तदपेक्षान्तर्भागश्च नास्तीति नोभयत.प्रज्ञः ; अपितु सर्वगतः सर्वं जानातीत्यर्थः । **नप्रज्ञा-नघनः** न घनीभूतज्ञान· । घनत्व बहुलत्वम् । बाहुल्यञ्च प्रसृमरद्रव्यस्य करतलादिप्रतिहतिकृतम् । यथा रविकिरणादेः । अन्तःप्रतिहात-

---

आनन्दमयेन सह स्वरूपैक्यं न भवति । राज्ञो भृत्यस्येवात्यन्तद्वैतं तु नतराम् । पूर्वमेव तस्यान्तर्यामितया अपृथक्स्थितेः। मुक्तस्य मर्त्य= मरणादि न भवति । अमृतं तु 'आभूतसंप्लवं स्थानममृतत्वं तु भाष्यते, इत्युक्तं नतराम् । कर्माधीनजन्मतत्वाभावेन मरणामृतयो-रुक्तयोरप्रसक्तेः इत्यर्थोऽस्तु—नान्तःप्रज्ञ इत्यादिना च, 'अन्तःप्रज्ञा भवन्त्येते सुखदुःखसमन्विताः' इत्युक्तवृक्षादिरूपजन्मभेदा विष्णु-पुराणोक्ताः अन्तःप्रज्ञादिशब्दवाच्या जीवस्य न भवन्ति मुक्ता-

नाप्रज्ञ , अपि नो विदित वेद्य नास्ति । इत्येतन्निर्वाणमनुशासनम् । इति वेदानुशासनम्। इति वेदनुशासनम् ॥

इति सुबालोपनिषदि पञ्चम खण्ड ॥

हेतुकथनीभावनिषेधात् प्रतिहति निषिद्धा भवति । अप्रतिहतज्ञान इत्यर्थ । **नप्रज्ञ.** प्रकृष्ट ज्ञान प्रज्ञा । अपरोक्षज्ञान प्रकृष्टज्ञानम् । इन्द्रिययोगाभ्यासादिजन्यज्ञानरहित इत्यर्थ । **नाप्रज्ञः** तथाऽपि न *प्रकृष्टज्ञानशून्य इत्यर्थ । अपितु हेतुनिरपेक्षस्वाभाविकसर्वसाक्षात्कारवा* नित्यर्थ । **नो विदित वेद्य नास्तीति** । तस्य सर्वेश्वरस्य विदितमतीत- ज्ञानविषयो नास्ति । **वेद्यम्** आगामिज्ञानविषयश्च नास्ति । किंतु सर्वे नित्यज्ञानगम्यमित्यर्थ । **इत्येतन्निर्वाणमनुशासनम्** । एव सर्वेश्वरस्य गुणविभूतिप्रकर्षवैशिष्ट्यविषयमिदमनुशासन मोक्षहेतु । **इति वेदानु शासनम्** वेदपुरुषस्योपदेश । अभ्यास समाप्तिद्योतक , आदरकृतो वा॥

इति श्रीहरितकुलतिलकवाग्विजयिसूनो श्रीरङ्गराजदिव्याज्ञालब्ध
वेदव्यासापरनामधेयस्य **श्रीसुदर्शनार्यस्य** कृतिषु
सुबालोपनिषद्विवरणे पञ्चम खण्ड ॥ *

॥ श्रीसुदर्शनार्यमहादेशिकाय नम ॥

शुभमस्तु

---

*एतदुपरि इद भाष्य नोपलभ्यते । तावता एतदुपरि नेयमुप निषदिति तु न मन्तव्यम् । प्रत्यक्षविरोधात् एतद्भाष्यश्रीभाष्यादि- विरोधाच्च । उपरितनानि वाक्यानि हि श्रीभाष्यादावत्र च तत्र तत्रोदाहृतानि ।

वित्युच्यते, न प्रज्ञानघन इत्यादिना मुक्तस्य जाग्रत्स्वप्नसुषुप्तवैलक्षण्यमुच्यते। अपि नो इत्यादिना च तस्य सार्वज्ञ्यम्। एतन्निर्वाणमिति च, 'निर्वाणमय एवायमात्मा ज्ञानमयोऽखिलः' इत्युक्तरीत्या आनन्दरूपता। तथाच आनन्दमये लीनस्य सार्वत्रिकसार्वकालिकज्ञानभोगसाम्यात् तदविशेषात् लयात्मतेति पूर्वोक्तविवरणरूपत्वमुपरितनसंदर्भस्येति चेन्न—

सर्वलयन इत्यादेः लयात्मेत्यन्तस्य परमात्मपरत्वात्, नान्तःप्रज्ञ इत्युपरितनप्रथमान्तानामपि तत्परत्वौचित्यात् मध्यवाक्यस्यापि तद्विषयत्वस्यावश्यकत्वात्। अन्यथा एकत्वं नास्ति इति अद्वैतमतनिषेधः; द्वैतं नास्तीति द्वैतमतनिषेधः; तेन विशिष्टाद्वैतमतसिद्धिरित्यादिकथनस्यापत्तेः। नान्तःप्रज्ञ इत्यादौ अस्तीत्यप्रयोगात् नञो भेद एवार्थः, न संसर्गाभावः। एवं तादृशतादृशज्ञातृभेदे कथिते सर्वथा अज्ञत्वमापतेदिति नाप्रज्ञ इति तन्निषेधः कृतः। तर्हि कियत् तज्ज्ञानमित्यत्र सर्वविषयकमिति अपि नो विदितमित्यादिनोच्यते। ननु 'नाप्रज्ञं' इत्यत्र प्रज्ञा नाम प्रमा। अप्रज्ञत्वं भ्रान्तत्वम्। तन्निषेध इत्यर्थोऽस्तु' इति चेत्—अत्यन्ताप्रसक्तनिषेधस्तदा स्यादिति। अपि नो विदितमित्यत्र वर्तमानवेदनविषयनिषेधाभावात् न सर्वनिषेधे तात्पर्यम्। तत् सिद्धं परमात्मनः सर्ववैलक्षण्यप्रतिपादकमिदं सर्वमिति।

इतः परं सुबालोपनिषदि एकादश खण्डाः शिष्यन्ते। तेषां भाष्यादर्शनात् परिष्कारमात्रं भविष्यति।

ध्रीः

विवरणकृतां व्यासार्याणां प्रणम्य पदाम्बुजे
विनतनिखिलाचार्यश्रेणिर्विधित्सति विस्तरम्।
अनधिगतरान् अन्यां व्याख्यामशेषपरिष्कृति-
प्रवणहृदयः षष्ठात् खण्डात् स्वकीयकृतेर्मनाक्॥

प्रथमे खण्डे नसन्नासन्नसदसत् किञ्चित् प्रलयकालस्थितं प्रत्यबोधि। तदेव सृष्टिपश्चाद्भाविनं प्रलयमुपवर्ण्य, परस्तान्नसन्ना-

सन्नमदसदिति अन्वयादि । तत्र, 'दिग्देशकालेष्वस्तातिः' इति पाणिनिस्मरणात् कालार्थकत्वस्यापि संभवात् परस्तादित्यस्य, 'तमः परे देव एकीभवति' इत्युक्तैकीभावानन्तरकाले इत्यर्थाङ्गीकारे, येन देवेनैकीभावः तमस उक्तः, स एव नसन्नासन्नसदसदित्युक्त इति प्रतीयत एव । तमसस्तत्रैकीभूततया देवस्यैव प्राधान्यात् तस्यैव नसदित्यादिना ग्रहणौचित्यात् । प्रथमखण्डे नसदित्यादिनोक्तादेव, 'तस्मात् तमः संजायते' इति तमआविर्भावोक्तेश्च । परस्तादित्यस्य, 'आदित्यवर्णं तमसः परस्तात्' इत्यादिश्रुतिशैलीमनुरुध्य देशपरत्वेऽपि, प्रकृतिमण्डले सृष्टिं विधाय विहारपरः परो देवः प्रलये एतद्व्यापारादुपरतः परस्तात् नसदित्याद्युक्तप्रकारेणावतिष्ठत इत्युक्तं भवति । एतावता स परो देव इति प्रतिपन्नम् । तृतीयखण्डे स एव चेतनाचेतनवैलक्षण्येन मन्तव्यात्मत्वेनोपदिष्टः । तदेवात्मत्वमुपपादयितुं प्रवृत्य चतुर्थे हृदयान्तः तस्य स्थितिं मनसि निधाय जीवस्य जाग्रदाद्यवस्थाः कथयित्वा, तत्र ग्राह्यग्राहकादिषु सर्वेष्वयमात्माऽस्ति, हृदयाकाशे चेति तादृशात्मोपासनं प्रदर्शितम् । अथ तस्येतरवैलक्षण्यमुपवर्णितम्, 'एष सर्वेश' इत्यादिना ।

"षाड्गुण्याद् वासुदेवः पर इति स भवान् (भवन् ?) मुक्तभोग्यो बलाढ्यात्

बोधात् संकर्षणस्त्वं हरसि वितनुषे शास्त्रमैश्वर्यवीर्यात् ।
प्रद्युम्नः सर्गधर्मौ नयसि च भगवन् शक्तितेजोऽनिरुद्धो

बिभ्राणः पासि तत्त्वं गमयसि च तथा व्यूह्य रङ्गाधिराज ॥"

इत्युक्तरीत्या द्विकद्विकरूपेण विभक्तगुणमध्ये ज्ञानम्, ऐश्वर्यम्, पालनसामर्थ्यञ्च सर्वेश इत्यादिना निर्दिश्य तेन व्यूहत्रयमुपक्षिप्य, स एवान्तर्याम्यात्मा सर्वसृष्टिस्थितिसंहारकारणमित्युपपाद्य, मुक्तौ लयोऽपि तत्रैवेत्युपरि उपदिष्टम् । स च जगन्निमित्तोपादानभूतो मोक्षप्रदः परो देव आनन्दमयः, स यश्चायं पुरुषे, यश्चासावादित्ये, पुण्डरीकाक्षः

॥ अथ षष्ठः खण्डः ॥

नैवेह किञ्चनाग्र आसीदमूलमनाधारम् ।

पुरुषोत्तमो नारायण इति च तत्र सुबोधमेव । अथापि उक्तोपासनफलभूतपरमपदप्राप्तिप्रकारपरिशीलनार्थमुपरि प्रवृत्तेयमुपनिषत् षष्ठे खण्डे परमपदस्वरूपमुपवर्णयन्ती पूर्वोक्तं कारणं नारायण इति च मुक्तकण्ठमाह । तेन तत्स्थानमेव परमं पदमिति प्रतिष्ठापितं भवति । तदा च परस्तान्नसदित्यत्र परस्तात्पदार्थोऽपि स्फुटं प्रदर्शितो भवतीति ।

तत्र कोऽसौ देवः परस्तात् स्थितः । यदि च स परस्तात् स्थितः, तदा तदाधारदेशादेः सद्भावावगमात् असदेवेदमग्र आसीदित्यादि कथम्? अथ सर्वसृष्ट्यारम्भे स देशो नास्ति, तर्हि तदाधारकः स देवोऽपि नास्तीति अन्यदेव किञ्चित् जगत्कारणं वक्तव्यम् । कारणं तु ध्येय इति श्रवणात् तदेव मुक्तये उपास्यं स्यात्, न तु प्रागुक्तो देव इत्याशङ्कायाम्—, न सृष्ट्यारम्भकाले सर्वं न पदार्थास्तत्वम्, नापि तस्माद् देवादन्यः कारणम्; येनान्योपासनं प्रसजेत् । स एव तु देवः सृष्टिस्थितिसंहारकारणमिति दशमखण्डपर्यन्तेन भागेनोपदिश्यते नैवेहेति । वाक्यमिदम् अन्तर्याम्यधिकरणे श्रीभाष्ये उपात्तम् । इह = तमोमण्डले । अमूलमिति अकारणकोक्तावपि आधारसापेक्षनित्यपदार्थान्तरवत् साधारत्वप्रतीतिः स्यात्, तद्व्यवच्छेदाय अनाधारमिति । उत्पत्तौ स्थितौ च परसापेक्षकार्यवस्तुविलक्षणम्, स्थितौ परसापेक्षनित्यपदार्थविलक्षणञ्च यत् प्रथमकारणम्, तत् इह प्रकृतिमण्डले किञ्चिद्रूपेण नासीदित्यर्थः । तथा च नित्यविभूतौ तस्यानेकात्मना तदाऽवस्थानेऽपि प्रकृतिमण्डले तथावस्थानाभावात् असद्वा इदमग्र आसीदिति प्राकृतकार्यात्मना दृश्यमानस्यैतन्नामरूपविभागराहित्यवर्णनमुपपन्नम् । परस्तादित्युक्तो देशश्च न कदाऽपि

इमाः प्रजाः प्रजायन्ते दिव्यो देव एको नारायणः ।

जायते, नापि नश्यति ; नापि तस्य प्रकृतं देवं प्रति आधारता ; अनाधारकत्वात् । प्रत्युत स देशोऽपि तद्देवधार्य एव । कामं तु तदीयो दिव्यमङ्गलविग्रहः तद्देशाधारको भवितुमर्हति । तावता न काचित् क्षतिरित्युक्तं भवति । अत्र किञ्चिदिति पदं, इमाः प्रजाः प्रजायन्त इति वाक्यविवक्षितकार्यान्तर्गतकिञ्चित्परम् ।

इमाः प्रजाः प्रजायन्त इत्यत्र तत इति पूरणीयम् । जनिकारणं स्पष्टं निर्दिशति दिव्यो देव एको नारायण इति । यद्वा प्रजायन्त इत्यन्तस्य पृथग्वाक्यत्वं विनैव निर्वाहे वाक्यभेदो न युक्तः । यदाहुः, 'संभवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यते' इति । अतः, 'दिव्यो देव एको नारायणः इमाः प्रजाः प्रजायन्ते' इतीदमेकं वाक्यम् । न च प्रजायन्त इति बहुवचनानुपपत्तिः ; 'सुवर्णं खदिराङ्गारसवर्णे कुण्डले भवतः' इति विधेयानुसारेणापि तिङ्विभक्तिवचनप्रयोगस्य महाभाष्ये दर्शितत्वात् । उदाहृतश्चेदं न्यायपरिशुद्धौ । अत्र इमाः इति प्रकृत-पदार्थं निर्दिश्य कारणे तद्वैलक्षण्यं दिव्य इत्यादिना दर्शितम् । दिवि नित्यविभूतौ भवो दिव्यः । परस्त दिवि प्रागुक्तविवरणमेतत् । देव इति परे देवे इति प्रागुक्तपरामर्शः । प्रजारूपेण जननं तस्य लीलार्थं केवलम् । एवं जायमानोऽपि द्योतमान एव, अकर्मवश्यत्वादित्यु-च्यतेऽनेन । ब्रह्मरुद्रादीनामीदृशं देवत्वं नास्तीति एक इत्यनेनोक्तम् । अयमेक एव देवः ; अन्येषां तु जीवत्वात् देवत्वं न पुष्कलमिति च भावः । उपादानातिरिक्तनिमित्तकारणव्यवच्छेदो वा एक इति । देवान्तरशङ्का दूरत एव निरस्यता नामविशेषेण तं निर्दिशति नारायण इति । एतन्नामार्थविशेषाश्च रहस्यग्रन्थेष्वनुसंधेयाः ।

पूर्वं प्राणेषु चक्षुरादिषु, भूतेषु च द्रष्टव्यादिषु यस्याऽऽत्मन उपासनमुक्तम्, सः तथा तदनुसानेकाध्यायमेव नारायण इत्याह

चक्षुश्च द्रष्टव्यं च नारायणः । श्रोत्रञ्च श्रोतव्यं च नारायणो घ्राणं च घ्रातव्यं च नारायणो जिह्वा च रसयितव्यञ्च नारायणः । त्वक् च स्पर्शयितव्यञ्च नारायणो मनश्च मन्तव्यञ्च नारायणो बुद्धिश्च बोद्धव्यञ्च नारायणोऽहङ्कारश्चाहङ्कर्तव्यञ्च नारायणः चित्तञ्च चेतयितव्यञ्च नारायणो वाक् च वक्तव्यञ्च नारायणो हस्तौ चाऽऽदातव्यञ्च नारायणः । पादौ च गन्तव्यञ्च नारायणः । पायुश्च विसर्जयितव्यञ्च नारायणः । उपस्थश्चाऽऽनन्दयितव्यञ्च नारायणः ।

धाता विधाता कर्ता विकर्ता दिव्यो देव एको नारायणः ।

आदित्या रुद्रा मरुतो वसवोऽश्विनौ ऋचो यजूंषि सामानि मन्त्रोऽग्निराज्याहुतिर्नारायणः ।

चक्षुश्चेत्यादिना । एवञ्च प्रजारूपेणेव चक्षुरादिरूपेण स जात इहेति ज्ञापितं भवति । यद्यपि मनोबुद्ध्यहङ्कारचित्तशब्दाः एकस्यैवान्तःकरणस्यावस्थाभेदविशिष्टस्य वाचकाः इत्युक्तं श्रीभाष्ये, 'अध्यवसायाभिमानचिन्तावृत्तिभेदात् मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते' इति-तथाप्यत्र पूर्वखण्डभाष्यगतिरेवानुसर्तव्या ।

धाता सर्वस्य स्रष्टा । विधाता श्रुत्यादिरूपशासनकर्ता । कर्ता पुण्यपापोदासीनरूपजीवकर्मप्रधानकर्ता । विकर्ता तज्जनितजैवसुखदुःखानुरूपलीलारसानुभावी । हेयसुखदुःखानुभवरूपविकारस्तु न तस्य भवति । आरोपस्तु स्यात् । यथोक्तं नामसहस्रभाष्ये, "स्वार्थहर्षशोकाद्यभावेऽपि परार्थत्वप्रसक्तिरदोषः" इति । अर्थः= फलम् । प्रसक्तिः= आरोपः । परफलभूतदुःखाद्यारोपमात्रं भगवता स्वस्मिन् क्रियत इति तदर्थः । आराध्यदेवता-तत्प्रतिपादकवेद-तदाराधनादीनामपि तन्मयत्वमाह आदित्या इत्यादिना ।

उद्भवः संभवो दिव्यो देव एको नारायण. ।
माता पिता भ्राता निवास· शरणं सुहृत् गतिर्नारायणः ।

उद्भवः उत्पत्ति स्थानम्; संभवः प्रलयस्थानम्; 'प्रभवप्रलयस्थानम्' इति गीतोक्तेः। अथवा उद्भवः = अचेतनगतः स्वरूपविकारः। संभवः = चेतनस्य स्वभावविकारो देहप्राप्त्यादिः । लोके मातापित्रादिभावेन मिपतां तद्भावः कर्माधीनः कादाचित्कश्चेति सोपाधिकः; नारायणस्य तु निरुपाधिक इत्याह मातेत्यादिना। ननु न स्वरूपेण मातृत्वादिकमिहोच्यते किन्तु लोके मात्रादिरूपेण प्रतिपन्नानां नारायणान्तर्यामिकत्वम्; चक्षुश्च द्रष्टव्यञ्चेत्यादिना अन्तर्यामित्वनिबन्धनस्य सामानाधिकरण्यस्यैव प्रक्रमात् । एवमेव चोपबृंहितमिदं गीतासु—

'पिताऽहमस्य जगतो माता धाता पितामहः ।'

'गतिर्भर्ता प्रभुः साक्षी निवास. शरणं सुहृत्' इति—

इति चेत्—स्वरूपेण मातृत्वादिपरमप्युपबृंहणमस्ति । यथा

'नारशब्देन जीवानां समूहः प्रोच्यते बुधैः ।
तेषामयनभूतत्वान्नारायण इहोच्यते ॥
तस्मान्नारायणं बन्धुं मातरं पितरं गुरुम् ।
निवासं शरणञ्चाहुर्वेदवेदान्तपारगाः ॥' इति ।

अत एव *नामसहस्रभाष्ये शरणवदभाषणावसरे एतद्वाक्य*मुपात्तम्, 'निवासः शरणं सुहृद् गतिर्नारायणः' इति । एतदनुसारेणैव पूर्वं धाता विधातेत्यादीनामपि साक्षादेव सामानाधिकरण्यं स्वीकृतम्, यत्र बाधः तत्र परं परम्परयेति कृत्वा । मात्राद्यनुकूलजनान्तर्यामित्वमिव प्रतिकूलान्तर्यामित्वमप्यस्य अविशिष्टमिति च एतद्वर्णनकृतो विशेषः। साक्षादन्वयार्थविशेषकथने च महिमातिशयः प्रदर्शितो भवति; अन्येषां मातृत्वादिकमेतदधीनमित्यर्थोऽप्यर्थसिद्धो भवतीति तादृशोपबृंहणभावः ।

विराजासुदर्शनाजितासौम्यामोघाकुमाराऽमृतासत्यामध्यमानासीराशिशुरासूरामूर्धाभास्वरा (शिशुमूर्धाऽसुराभास्वती ?) विज्ञेयानि नाडीनामानि दिव्यानि ।

गर्जति गायति वाति वर्षति । वरुणोऽर्यमा चन्द्रमाः कला कलिर्धाता ब्रह्मा प्रजापतिर्मघवा दिवसाश्चार्धदिवसाश्च कला. कल्पाश्चोर्ध्वं च दिशश्च सर्वं नारायणः ॥

पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

सर्वेन्द्रियस्कन्दभूतहृदयसंबन्धिन्यो याः चक्षुरादिनाड्य आत्माधारत्वेन प्राङ् निर्दिष्टाः ये नाड्यामिति, तासामपि नारायणात्मकत्वविवक्षया तासां नामानि पठति विराजेति । 'तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च' इत्युक्तरीत्या सर्वं कार्यं तदधीनमित्युच्यते गर्जतीत्यादिना । प्रधानदेवतानां प्रकृतिप्राकृतानामिव कालपरिणामादीनामप्यविशेषं तदन्तर्यामिकत्वमुच्यते वरुण इति । कला चन्द्रकलादिः । कलिः अन्तिमयुगदेवता । न केवलमेतत्सर्गान्तर्गतम्, पूर्वोत्तरसर्वसर्गादिगतमपि स इत्युच्यते पुरुष इति । एवं तावत् प्राकृतप्रपञ्चाभेदनिर्देशमुखेन प्रपञ्चं प्रति आत्मत्वं तदीशानत्वादिरूपमुपक्षिप्य परस्तादिति प्रागुक्तपरमपदैश्वर्यमपि तस्य विस्तृणाति उतेति । तत्र नामरूपविभागभाजां बहूनां सद्भावादेव एतत्खण्डारम्भे इहेति निर्देशः तद्व्यावृत्तये कृत इति ध्येयम् । अमृतत्वस्येशानः मोक्षप्रदः । यद्वा न विद्यते मृतत्वं कस्यापि यत्र, तत् स्थानममृतत्वम् । तस्येशान इति । यत् अमृतत्वम् अन्ने प्राकृतभोगे सति नातिरोहति नातिशयेन भवति । प्रकृतिमण्डलेऽपि प्रत्यक्षितपरतत्त्वानां प्रशमितरागद्वेषादिकालुष्याणाम्, 'अमृतत्वञ्चानुपोष्य' इति सूचितम्, अमृत-

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत् परमं पदम् ॥
तदेतन्निर्वाणानुशासनम् । इति वेदानुशासनम् इति वेदानुशासनम् ।

॥ इति सुबालोपनिषदि षष्ठः खण्डः ॥

इह भवति' इति श्रुतं किञ्चिद्रूपममृतत्वमस्तीति विमृश्य अति इति प्रयुक्तम्। यद्वा अमृतत्वाख्यं परं पदम् अनेन, "त्रैगुण्यं षड्गुणाढ्यञ्च द्विधाप्तं परिकीर्तितम्। त्रैगुण्यमत्र बद्धानामितरेषामथेतरत्" इत्युक्तेन भगवद्रूपेण ज्ञानशक्त्यादिगुणषट्कपूर्णेनानेन अतिरोहति = अधिकं प्रतिक्षणमेधते इत्यर्थः ।

तस्य स्थानस्य सदापश्यत्सूरिसंकुलत्वमाह तदिति । तदिति अप्राकृतार्थकम् । तेन विष्णुपुराणोक्त (२. ८.) ध्रुवाधारभूत-सत्य-लोकार्वाचीन-प्राकृतविष्णुपरमपदरूपसंनिरूपस्थलयोर्व्यावृत्तिः। सदेति मुक्तव्यावृत्त्या सूरय इति नित्यसूरीणामेव ग्रहणम्। परमपदं वर्णयति दिवीति । दिवि अन्तरिक्षे आततं व्याप्तं चक्षुः सूर्य इव ज्योतिर्मयमिति यावत् । एवं मुक्तसेव्यमानमपि तदित्याह तदिति । तत् = तत्र यद्वा श्रुतिप्रसिद्धे, विप्रासः, 'विष्णुं क्रान्तं वासुदेवं विजानन् विप्रो विप्रत्वं गच्छते तत्त्वदर्शी' इति तत्त्वज्ञानसंपत्त्यधीनविप्रभावाः, 'श्रोत्रियस्य चाकामहतस्य' इत्युक्ताः क्रमेण प्राप्तपरमपदाः विपन्यवः विविधपनायनपरायणाः जागृवांसः अत्यन्ताविर्भूतबोधाः समिन्धते परिपूर्णब्रह्मानुभवपरीवाहभूतकैङ्कर्यार्थिदिनानन्तदिव्यदेहा दीव्यन्ति, यदेव विष्णोः परमं प्रकृष्टान्तररहितं पदम्, अन्यानि तु विष्णुस्थानानि अर्वाचीनानीति॥ एवमिह पूर्वोक्तदिशोपासनप्राप्यं परमपुरुषस्य विष्णोः नारायणस्य नित्यं स्थानं अमला इत्यादिपूर्वोक्तश्रुत्यविरोधेन भावितम्॥

इति श्रीवात्स्यसच्चक्रवर्ति वीरराघवाचार्यकृतिषु

उपनिषद्भाष्यकारे सौबालषष्ठखण्डपरिष्कारः ॥

॥ अथ सप्तमः खण्डः ॥

अन्तश्शरीरे निहितो गुहायामज एको नित्यः ;

ननु प्रथमखण्डे, यस्य तमसः प्रलये देवे एकीभावः, तस्मात् भूताद्युत्पत्तिवर्णनात् तमस एवोपादानत्वं प्रतीयते। देवस्य तु, 'मृत्युमसृजत्' इत्युक्तरीत्या निमित्तत्वम्। तृतीयखण्डे असद्वा इत्यत्रापि तस्योपादानत्वं न स्पष्टम्। पञ्चमखण्डे च चक्षुर्द्रष्टव्यादि-सर्ववस्तुगततया ततो भिन्नत्वेनैव स आत्मा निर्दिष्टः। षष्ठे तु देवे सर्वकार्यभेदवर्णनात् कार्याभिन्नं कारणं प्रतीतं तत् उपादानमिति च ज्ञेयं भवति। न च चक्षुरादिषु वर्तमानत्वेन प्रागुक्तस्य चक्षुराद्यभेदः संभवति, येन समानाधिकरणनिर्देशो मुख्यः स्यादित्याशङ्कायाम्—सर्वस्यापि वस्तुनः तं प्रति शरीरत्वात्, शरीरवाचिनाञ्च शब्दानां शरीरिपर्यन्तार्थकत्वस्य लोकवेदसंप्रतिपन्नत्वात् सामानाधिकरण्यं मुख्यमेव। अतः तत्तद्वस्तुविशिष्टं ब्रह्म कार्यं कारणञ्च भवतीति हेतोः षष्ठदर्शितमुपादानत्वमप्युपपन्नमिति बुबोधयिषया सर्वस्य तच्छरीरत्वं प्रपञ्चयति सप्तमे अन्तश्शरीर इति। जायमानानां प्रजानां सर्वासां शरीरस्यान्तः हृदयगुहायामस्य वर्तमानत्वात् अस्य शरीरस्य तत्तत्स्य प्रत्यगात्मनश्च तं प्रति शरीरत्वात्, 'इमाः प्रजाः प्रजायन्ते दिव्यो देव एकः' इति सामानाधिकरण्यमुपपन्नम्। शरीरान्तःस्थिति-दशायामिव शरीरात् पृथक्स्थितावपि जीवस्तस्यान्तर्यामिक इति उपरितनरीत्या ज्ञातव्यम्। अस्मिन् शरीर इव, येषामिदं संघातरूपम्, तेषु पृथिव्यादिभूत—चक्षुरादिकरणेषु तत्कारणेष्वपि तच्छरीरत्वप्र-विशिष्टमिति सर्वेषमपि सामानाधिकरण्यं सुस्थमिति ज्ञापनाय पीठिकेयम्।

न केवलं शरीरतया सर्वप्रतिपन्नवस्तुमात्रे तस्य आत्मतया स्थितिः, कार्यकारणात्मसु सर्वेषु पदार्थेष्वपि तस्य तथाभाव इति ज्ञाप-यितुं प्रायः सृष्टिक्रमव्युत्क्रमेण पृथिव्यादिप्रधानान्तसर्ववस्तुविवक्षया

यस्य पृथिवी शरीरम्, यः पृथिवीमन्तरे सञ्चरन्, यं पृथिवी न वेद; यस्यापः शरीरं योऽपोऽन्तरे सञ्चरन् यमापो न विदुः; यस्य तेजः शरीरं यस्तेजोऽन्तरे सञ्चरन् यं तेजो न वेद; यस्य वायुः शरीरं यो वायुमन्तरे सञ्चरन् यं वायुर्न वेद, यस्याकाशः शरीरं य आकाशमन्तरे सञ्चरन् यमाकाशो न वेद, यस्य मनः शरीरं यो मनोऽन्तरे सञ्चरन् यं मनो न वेद, यस्य बुद्धिः शरीरं यो बुद्धिमन्तरे सञ्चरन् य

प्राधान्येन केषाञ्चित् तच्छरीरत्वमाह यस्य पृथिवीत्यादिना। बृहदारण्यके काण्वमाध्यन्दिनभेदेन द्विविधेऽपि अन्तर्यामिब्राह्मणे किञ्चिद्भेदेनायमर्थ एव प्रत्यपादि। एषां पर्यायाणां शरीरात्मभावप्रतिपादनार्थप्रवृत्तत्वात् शरीरमिति तस्य प्रथमतो निर्देशः। तत्र शरीरभावे परमात्मनः (तत्तद्वस्तुभावदेशवर्तित्वरूप) बहिर्वर्तित्वांशस्याप्रयोजकतया अन्तर्वर्तित्वमात्रमाह यः पृथिवीमन्तरे सञ्चरन् इति। पृथिवीमन्तरे अन्तःपृथिव्याम्। सप्तम्यर्थे द्वितीया; 'य एतस्मिन् सर्वस्मिन्नन्तरे संचरति' इति पूर्वानुसारात्। सञ्चरन्निति तिष्ठन्नित्यर्थकम्, विभुनः परमात्मस्वरूपस्य चलनायोगात्। अन्तर्वर्तित्वञ्च यद्देशावच्छेदेन पृथिव्यादिकमस्ति, तत्र देशे सर्वत्र तेन सह वर्तमानत्वम्, संचरन्निति शब्दस्यार्थान्तरवर्णनवत् अन्तर इति पदस्यान्ययोग्यार्थवर्णनं युक्तम्। आत्मनोऽन्तरेऽपि स्थितेर्वक्तव्यत्वादित्यन्यत्र विस्तरः। यं पृथिवी न वेदेति। प्रत्यक्षायोग्यस्यानुपलम्भमात्रेण न निषेध इति व्यक्तये एतदुक्तिः। ननु देवतारूपपृथिव्याः वेदितृत्वयोग्यता स्यात्। अचेतनायास्तु पृथिव्याः तदभावात् किमर्थं न वेदेत्युक्तिरिति चेत्-परमात्मवेदनविषये अचेतनतुल्यं चेतनस्याप्यसामर्थ्यमिति ज्ञापनार्थमेतदुक्तिरिति। भूतकथनं तन्मात्रोपलक्षणम्। मनआदिचतुष्टयमप्येकान्तःकरणप्रभेदः। पूर्ववत् महदहङ्कारग्रहणं वा।

बुद्धिर्न वेद ; यस्याहङ्कारः शरीरं योऽहङ्कारमन्तरे सञ्चरन् यमहङ्कारो न वेद ; यस्य चित्तं शरीरं यश्चित्तमन्तरे सञ्चरन् यं चित्तं न वेद ; यस्याव्यक्तं शरीरं योऽव्यक्तमन्तरे सञ्चरन् यमव्यक्तं न वेद ; यस्याक्षरं शरीरं योऽक्षरमन्तरे सञ्चरन् यमक्षरं न वेद ; यस्य मृत्युः शरीरं यो मृत्युमन्तरे

मिन्द्रियान्तराणामप्युपलक्षणम्। अत्र आत्मपर्यायो नोक्तः, स बृहदारण्यके, 'य आत्मनि' इति, 'यो विज्ञाने' इति चोक्त इहापि ग्राह्यः। न चाक्षरपदेनेह आत्मनिर्देश एवेति वाच्यम्—अचेतनमध्यपाठेन तदयोगात्। 'अक्षरात् परतः परः' इति अक्षरशब्दस्य अचेतनेऽपि प्रयोगात्। पूर्वम्, 'अक्षरं तमसि लीयते' इत्युक्त्या अक्षरस्य तमसि लयादचेतनविषयत्वावसायाच्च। न हि चेतनोऽचेतने लीयते। न च लीयमानस्य तस्य क्षरत्वात् अक्षरत्वं कथमिति वाच्यम्—अचेतनसंबन्धिपरिणामान्तरात् पूर्वं न क्षरतीत्येतावता तद्वाचोयुक्तेः। अस्तु वा—तमोदशायां तदत्यन्तमस्फुटमभूत्। द्रव्यमिदं चेतनाचेतनात्मकमिति विवेकार्हता ततोऽस्तीति लक्षणया अक्षरपदेन तदुक्तिरिति। तदुक्तं प्राक् भाष्य एव, "चिद्गर्भवस्तुनि अक्षरशब्द उपचरितः" इति। एवंसति चेतनविशिष्टाचेतनस्य परमात्मशरीरत्वोक्तौ विशेषणेऽपि तत् उक्तं भवतीति कथ्यतामिति चेत्—काममस्तु। एवम् 'अन्तश्शरीरे' इति प्रथमवाक्येऽपि आत्मनां शरीरत्वमभिप्रेतं स्यात्; गुहायामिति जीवग्रहणसंभवात्। एवम्, 'सर्वभूतान्तरात्मा' इति वक्ष्यमाणपदेनापि तत्सिद्धिः। अथापि बृहदारण्यके शाखाद्वये, 'य आत्मनि तिष्ठन्, यो विज्ञाने तिष्ठन्' इति शुद्धजीवान्तर्यामित्वस्यापि स्पष्टं कीर्तनं प्रकृतेऽप्यपेक्षितं ग्राह्यम्। मृत्युरिति स्वात्मप्रमाणात् तम उच्यते। 'तमः परे देव एकीभवति' इति प्रागुक्तमेव, 'मृत्युर्वै परे देव एकीभवति' इति प्रसिद्धवन्निर्देक्ष्यते। ततोऽपि मृत्युस्तमः। तस्य मृत्युत्वं स्वयमविलयस्य सतः सर्वचेतनपरिणामलयकरत्वात्।

सञ्चरन् यं मृत्युर्न वेद ; एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण एतां विद्यामपान्तरतमाय ददौ । अपान्तरतमो ब्रह्मणे ददौ । ब्रह्मा घोराङ्गिरसे ददौ । घोराङ्गिरा रैक्वाय ददौ । रैक्वो रामाय ददौ । राम. सर्वेभ्यो ददौ । इत्येवं निर्वाणानुशासनम् । इति वेदानुशासनम् इति वेदानुशासनम् ॥

॥ इति सुबालोपनिषदि सप्तमः खण्डः ॥

उक्तानां सर्वेषां यच्छब्दानां प्रति संबन्धी एष इति शब्दोऽय- मिति महावाक्यमेतत् । नन्वेतावन्ति चेत् अस्य शरीराणि, तर्हि तस्येवशरीरव्यापकाः पाप्मानः परिमंत्यातुमशक्याः स्युः, तत्राह अपहतपाप्मेति । दिव्य इत्यनेन अप्राकृतदिव्यमङ्गलविग्रहसद्भाव एव एतच्छरीरभावोऽपि केवलतदिच्छाकृत इति भावः । इमं प्रत्यक्पर-मात्मनोः शरीरात्मभावं वेदान्तप्रतितन्त्रसिद्धान्तमनुध्यमानाः प्रायो भेदश्रुतित्यागे न अभेदम्, अद्वैतश्रुतीरुपेक्ष्य भेदञ्चाद्रियमाणाः अपक्वबुद्धीन् भ्रामयन्ति। तस्मात् रहस्यमिदं न प्रसर्तव्यमिति अत्र श्रद्धातिशयजननाय प्रकृतार्थप्रापक गुरुपरम्परामाह एतां विद्यामिति। अत एव भगवद्रामानुजस्वामिपादा एवैतद्रहस्यवेदितार इति प्रशस्यते, 'यत्येतं यतिसार्वभौम कथितम्' इत्येवम् । ददावित्यत्र कर्त्रन्तराकथ-नात् चतुर्मुखस्यापि एतदनन्तरं ग्रहीतृतया वक्ष्यमाणत्वाच्चोचित्यात् नारायणः कर्तेत्यवसीयते । तस्य पूर्वप्रकृतत्वाच्च । अस्तु वा स एव इत्यारभ्य ददौ इत्यन्तमेकं वाक्यम् ; भेदे प्रमाणाभावात्। श्रीभाष्या-दिषु नारायण इत्यन्तमात्रनिर्देशः तावन्मात्रस्य तत्रोपयुक्तत्वात् । न तेन तत्र वाक्यसमाप्तिप्रसक्तिः । अपान्तरतमायेति । 'अपान्तरतमो नाम वेदाचार्यः स उच्यते' इति तस्यैव सर्ववेदवेदित्वं भारते भणितम् । तत्र हि, 'सांख्यस्य वक्ता कपिलः' इत्यादितत्तन्मतप्रवर्तक-महर्षीनपेक्ष्यास्य महिमा गमितोऽस्ति । 'पाञ्चरात्रस्य कृत्स्नस्य वक्ता

॥ अथाष्टमः खण्डः ॥

अन्तश्शरीरे निहितो गुहायां शुद्धः सोऽयमात्मा ।

नारायणः स्वयम्' इति ततोऽनिशयितो नारायण एव, य इहापान्तरतमस्याचार्यो निर्दिष्टः । तस्यैव वेदव्यासरूपेणावतारश्चोक्तोऽस्ति इति । अपान्तरतमाः इति भारतपाठः ।

एवमत्यन्तरहस्यार्थभूतस्य शरीरात्मभावस्योपदेशेन पूर्वखण्डोक्तं सामानाधिकरण्यं निरूढम् ।

इति उपनिषद्भाष्यपरिष्कारे सौबालसप्तमखण्डपरिष्कारः ॥

ननु सत्यस्मिन् शरीरात्मभावे सर्वमेतदुपपद्यते । स एव न स्वीकर्तुं शक्यते । तथासति अखिलहेयप्रत्यनीकत्वेनाभिमतस्य सकलहेयसंश्रयत्वप्रसङ्गात् । न च अपहतपाप्मा दिव्य इति तस्य दुःखहेतुभूतकर्मविरहवचनान्नायं प्रसङ्ग इति वाच्यम्—कर्मणां हि दुःखहेतुत्वम् आत्मनः शरीरसंबन्धापादनेन । तत्र यदि कर्मबलाद्वा अन्यथा वा शरीरसंबन्धविशेषः प्राप्तः, तर्हि दुःखस्पर्शमवर्जनीयम् । अन्तश्शरीरे स्वेच्छया नियमनार्थं प्रविष्टस्यापि अपुरुषार्थयोगोऽवर्जनीयः । पूयशोणितादिमज्जनं हि स्वेच्छाकारितमप्यपुरुषार्थ एव । ततश्चायं प्रश्नः समाधातुमशक्य एव लक्ष्यते—यः खलु

'एको यस्यास्ति देहः स भवति विविधानन्तदुःखैकभोक्ता

विश्वं देहः प्रभोश्चेत् स कथमतिपतेत् विश्वदुःखानुभूतिम् ?'

इति । एवमाशङ्कायाम्—'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः' इति न्यायेन परं तत्त्वमिदं परमविलक्षणं शास्त्रप्रतिपन्नम्, न तत्र सामान्यतोदृष्टन्यायावतार इति तस्य सर्वदोषदूरत्वं मुक्तकण्ठं वक्तुमष्टमः खण्ड आरभ्यते । निहितो गुहायां शुद्ध इति । स्वयमयं निहितः शरीरे, न मे दुःखलेशप्रसक्तिरिति । तदयं शुद्ध एवेत्यर्थः । शरीरस्य दुःखहेतुत्वोपयिकानि विशेषणान्यभिधाय तथात्वेऽपि हेयप्रतिभट-

सर्वस्य मेदोमांसक्लेदावकीर्णे शरीरमध्येऽत्यन्तोपहते चित्रभित्तिप्रतीकाशे गन्धर्वनगरोपमे कदलीगर्भवन्निःसारे जलबुद्बुदवच्चञ्चले निःसृतमात्मानमचिन्त्यरूपं दिव्यं देवमसङ्गं शुद्धं तेजस्कायमरूपं सर्वेश्वरम् अचिन्त्यमशरीरं निहितं गुहायाममृतं विभ्राजमानमानन्दं तं पश्यन्ति विद्वांसः । तेन लये न पश्यन्ति ॥

॥ इति सुबालोपनिषदि अष्टमः खण्डः ॥

त्वमुपपादयति सर्वस्येत्यादिना । अत्यन्तोपहते = तत्तदवयवोपनतैः रोगादिभिः मलमूत्रादिसंगेन चोपप्लुते । निःसृतम् निश्शेषेण प्रविष्टम् । अन्तर्बहिर्व्याप्तम् । अचिन्त्यरूपम् अनुमानदूरादद्भुतमङ्गलविग्रहम् । असङ्गम्, 'न मे कर्मफले स्पृहा' इत्युक्तप्रकारम् । तेजस्कायं ज्ञानस्वरूपम् । अरूपं रूपरसादिहेयरहितस्वरूपम् । अचिन्त्यम् स्वकीयदिव्यविग्रहवत् स्वयमप्यनुमानदूरम् । अशरीरम् स्वकर्माधीनशरीरविशिष्टविलक्षणम् । गुहायां हृदयाकाशे निहितम् । अमृतम् 'एष ते आत्माऽन्तर्याम्यमृतः' इति अन्तःस्थितावप्यमृतत्वेनोद्घुष्टम् अत्यन्तभोग्यभूतम् । विभ्राजमानम् 'अनश्नन्नन्योऽभिचाकशीति' इत्युक्तरीत्या विशेषतो द्योतमानम् । न केवलमुक्तिमात्रम् । दर्शनस्यापि संप्रतिपन्नत्वादत्र न संदेग्धव्यमित्याह आनन्दं तं पश्यन्तीति । गन्धर्वनगरं = मेघमण्डले उत्प्रेक्षिताः नगराद्याकाराः । तद्वत् क्षणविशरणशीलस्यापि शरीरस्य चित्रभित्तिप्रतीकाशत्वमिति कश्चिदतिशयोऽस्ति । यथा भित्तेरभावे चित्रं न शक्यं लेखितुम्, तथा शरीराभावे हार्दो न शक्य उपासितुम् । अतस्तत्र गुहानिहितमुपासितं परिच्छिन्नं लये जाते न पश्यन्तीत्याह तेन लये न पश्यन्तीति । इदञ्च लयविषयकजिज्ञासोत्पादनाय आचार्येण प्रस्तुतम् । प्रक्ष्यति चेममेव विषयं समनन्तरमेव शिष्यो रैक्वः । वस्तुतः, लयपर्यन्तमेवमुपासन-

॥ अथ नवम खण्डः ॥

अथ हैनं रैक्व पप्रच्छ—भगवन्! कस्मिन् सर्वेऽस्तं गच्छन्तीति। तस्मै स होवाच—चक्षुरेवाप्येति। यश्चक्षुरेवास्तमेति, द्रष्टव्यमेवाप्येति। यो द्रष्टव्यमेवास्तमेति, आदित्यमेवाप्येति। य आदित्यमेवास्तमेति विराजमेवाप्येति। यो विराज(?)मेवास्तमेति, प्राणमेवाप्येति, य प्राणमेवास्तमेति, विज्ञानमेवाप्येति। यो विज्ञानमेवास्तमेति,

---

स्याऽऽवृत्तिरपेक्षितेति ज्ञापनायेतदुक्तिरिति च भाव्यम्।

इति उपनिषद्भाष्यपरिष्कारे सौबालाष्टमखण्डपरिष्कारः ॥

एवं सर्वान्तर्वर्तिनोऽपि सर्वदोषदूरत्वमुपवर्ण्य चक्षुराद्यात्मतया तदुपासनं स्थापितम्। एवमुपासीनस्य फलमुमुक्षुतया लयप्रस्तावानुरोधेन लयमधिकृत्यैव इत ऐक्वप्रश्नमुपक्षिपति अथ हैनमिति। सर्व=चक्षुः श्रोत्रादिस्थानभेदेनोपासनप्रवृत्ताः सर्वे। यो यदुपासनप्रवृत्तः, तस्य तत्रैव लयः। अतः चक्षुरादिपर्यायेषु एकैकत्रापि, 'यश्चक्षुषि यो द्रष्टव्ये' इत्यादिना करण-तद्विषय-तद्देवता-तन्नाडी-तन्निग्राहकप्राण-तज्जन्यज्ञान-तज्जनितानन्द-तत्कन्दस्थानभूतहृदयाकाशरूपस्वप्रकाशान्तर्वर्त्यात्मोपासनविधानात् तत्तद्वस्थान्तर्यामिण्येव स स उपासको लीयते। तेन परमपदस्थ एव पुरुषे लयः संपद्यते इत्याशयेनाह तस्मै स होवाच चक्षुरेवेत्यादिना। अत्र चक्षुरादिपदानि पूर्वखण्डपर्यन्तोपपादितरीत्या, 'चक्षुश्च द्रष्टव्यञ्च नारायण' इत्यत्रेव परमात्मपर्यन्तानि। अत उपासिते चक्षुश्शरीरके परमात्मनि लीयते, तल्लय एव द्रष्टव्यशरीरकपरमात्मलयः। एवं तत्तदवच्छिन्नात्मनि उपासिते सर्वत्र लयो द्रष्टव्यः। विराजामिति आकारान्तपाठो युक्तः पूर्वं तथा नाडीनामनिर्देशात्। अन्यथा तत्पर्यायतया विराट्पदमिदमिति मन्तव्यम्। तुरीयमेवाप्येतीति।

आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

श्रोत्रमेवाप्येति । यः श्रोत्रमेवास्तमेति, श्रोतव्यमेवाप्येति ।

पूर्वं हृदयाकाश इत्युक्तमेव स्थानप्रमाणादत्र तुरीयपदेन गृह्यते । तुरीयशब्दश्च, "जाग्रत्स्वप्नात्पलसतुरीयमायध्यात्मकमवदुपास्यः" इत्यादौ मूर्छिते प्रयुक्तः । जागरस्वप्नसुषुप्तिस्थानेषु त्रिषु सत्सु तुरीयं मूर्छास्थानम् । तदा हृदयाद् वियुज्य हृदयाकाश एव जीवो वर्तत इति तदाकाशं तुरीयशब्दकम् । इह च चक्षुरादिपदवत् तुरीयपदमपि परमात्मपर्यन्तम् । एवमष्टकान्तरात्मन एवामृतत्वादिनोपासनस्य प्रागुक्तत्वात् तुरीये लीनस्य तत्र लय उच्यते तदमृतमित्यादिना । अत्र निर्बीजपदप्रयोगः लयकाष्ठाभूत—परवासुदेवात्मक—शुद्धपरमात्मस्वरूपस्य अमृतमित्यादिपदविवक्षितत्वज्ञापनार्थः ।

अयं प्रश्नाशयः—यथोपासनं प्राप्तिः तत्क्रतुन्यायप्रसिद्धा । अतो यदुपास्यते तत्र लीयत इति वक्तव्यम् । चक्षुरादिनाशानन्तरञ्च तं न पश्यन्तीत्युक्त्या उपासिते लयः उपासकानां न सिद्ध्यतीति । समाधेराशयस्तु—चक्षुर्द्रष्टव्यादित्यादीनां बहूनामुपास्यतया बहुषु लय एकस्य कथं भवतीत्यपि चिन्तव्यम् । चक्षुरादीनामनेकत्वेऽपि चक्षुराद्यन्तर्यामिण उपास्यस्यैकत्वात् उपास्यपरिच्छेदार्थमेषामुपयोगेऽपि तस्यैकस्यैव मुख्योपास्यत्वात् तत्रैव लयो वाच्यः । अतोऽयमुपासकः चक्षुरेवाप्येति, न द्रष्टव्यम् । न च द्रष्टव्यादिषु लयः कुतो नेति शङ्काप्रसक्तिः, चक्षुर्द्रष्टव्यादीनामेकत्वादेतल्लयस्यैव तल्लयरूपत्वात् । एवमुपलभ्यमानकार्यविशिष्टोपासनाविधानात् तत्तत्कार्ये लय आवश्यक इति न मन्तव्यम् । कार्यात्मनस्तस्य, निर्बीजस्य च तस्यैकत्वात् निर्बीजप्राप्त्यर्थतयैव एवमुपासनस्य विवक्षितत्वादितीतिध्येयम् ।

एवं श्रोत्रमेवेत्यादिपर्यायेष्वपि द्रष्टव्यम् । प्रतिपर्यायं स्त्रीलिङ्ग-

यः श्रोतव्यमेवास्तमेति, दिशमेवाप्येति। यो दिशमेवास्तमेति, सुदर्शनामेवाप्येति। यः सुदर्शनामेवास्तमेति, अपानमेवाप्येति। योऽपान मेवास्तमेति, विज्ञानमेवाप्येति। यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति। य आनन्दमेवास्तमेति, तुरीयमेवाप्येति। यस्तुरीयमेवास्तमेति, तदमृतमशोकमभयमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

नासामेवाप्येति। यो नासामेवास्तमेति, घ्रातव्यमेवाप्येति। यो घ्रातव्यमेवास्तमेति, पृथिवीमेवाप्येति। यः पृथिवीमेवास्तमेति, जितामेवाप्येति। यो जितामेवास्तमेति, व्यानमेवाप्येति। यो व्यान मेवास्तमेति, विज्ञानमेवाप्येति। यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति। य आनन्दमेवास्तमेति, तुरीयमेवाप्येति। यस्तुरीयमेवास्तमेति, तदमृतमशोकमभयमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

जिह्वामेवाप्येति। यो जिह्वामेवास्तमेति, रसयितव्यमेवाप्येति। यो रसयितव्यमेवास्तमेति, वरुणमेवाप्येति। यो वरुणमेवास्तमेति, सौम्यामेवाप्येति। यः सौम्यामेवास्तमेति, उदानमेवाप्येति। य उदानमेवास्तमेति, विज्ञानमेवाप्येति। यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति। य आनन्दमेवास्तमेति, तुरीयमेवाप्येति। यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

त्वचमेवाप्येति। यस्त्वचमेवास्तमेति, स्पर्शयितव्यमेवाप्येति। यः स्पर्शयितव्यमेवास्तमेति, वायुमेवाप्येति। यो वायुमेवास्तमेति, मोघामेवा-

शब्दाः नाडीविशेषपराः। तदनन्तरमप्ययस्थानत्वेन कथिताश्च प्राणविशेषा इति बोध्यम्।

प्येति । यो मोघामेवास्तमेति, समानमेवाप्येति । यः समानमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

वाचमेवाप्येति । यो वाचमेवास्तमेति, वक्तव्यमेवाप्येति । यो वक्तव्यमेवास्तमेति, अग्निमेवाप्येति । योऽग्निमेवास्तमेति, कुमारामेवाप्येति । यः कुमारामेवास्तमेति, वैरम्भमेवाप्येति । यो वैरम्भमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

हस्तमेवाप्येति । यो हस्तमेवास्तमेति, आदातव्यमेवाप्येति । य आदातव्यमेवास्तमेति, इन्द्रमेवाप्येति । य इन्द्रमेवास्तमेति, अमृतामेवाप्येति । योऽमृतामेवास्तमेति, मुख्यमेवाप्येति । यो मुख्यमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

पादमेवाप्येति । यः पादमेवास्तमेति, गन्तव्यमेवाप्येति । यो गन्तव्यमेवास्तमेति, विष्णुमेवाप्येति । यो विष्णुमेवास्तमेति, सत्यामेवाप्येति । यः सत्यामेवास्तमेति, अन्तर्याममेवाप्येति । योऽन्तर्याममेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभय-

मशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

पायुमेवाप्येति । यः पायुमेवास्तमेति, विसर्जयितव्यमेवाप्येति । यो विसर्जयितव्यमेवास्तमेति, मृत्युमेवाप्येति । यो मृत्युमेवास्तमेति, मध्यमामेवाप्येति । यो मध्यमामेवास्तमेति, प्रभञ्जनमेवाप्येति । यः प्रभञ्जनमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

उपस्थमेवाप्येति । य उपस्थमेवास्तमेति, आनन्दयितव्यमेवाप्येति । य आनन्दयितव्यमेवास्तमेति, प्रजापतिमेवाप्येति । यः प्रजापतिमेवास्तमेति, नासीरामेवाप्येति । यो नासीरामेवास्तमेति, कुमारमेवाप्येति । यः कुमारमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति। य आनन्दमेवास्तमेति, तुरीयमेवाप्येति। यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

मन एवाप्येति । यो मन एवास्तमेति, मन्तव्यमेवाप्येति । यो मन्तव्यमेवास्तमेति, चन्द्रमेवाप्येति । यश्चन्द्रमेवास्तमेति, शिशुमेवाप्येति । यः शिशुमेवास्तमेति, श्येनमेवाप्येति । यः श्येनमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

बुद्धिमेवाप्येति । यो बुद्धिमेवास्तमेति, बोद्धव्यमेवाप्येति । यो बोद्धव्यमेवास्तमेति, ब्रह्माणमेवाप्येति । यो ब्रह्माणमेवास्तमेति, सूर्यमेवा-

प्येति । यः सूर्यमेवास्तमेति, कृष्णमेवाप्येति । यः कृष्णमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

अहङ्कारमेवाप्येति । योऽहङ्कारमेवास्तमेति, अहङ्कर्तव्यमेवाप्येति । योऽहङ्कर्तव्यमेवास्तमेति, रुद्रमेवाप्येति । यो रुद्रमेवास्तमेति, असुरामेवाप्येति । योऽसुरामेवास्तमेति, श्वेतमेवाप्येति । यः श्वेतमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

चित्तमेवाप्येति । यश्चित्तमेवास्तमेति, चेतयितव्यमेवाप्येति । यश्चेतयितव्यमेवास्तमेति क्षेत्रज्ञमेवाप्येति । यः क्षेत्रज्ञमेवास्तमेति, भास्वतीमेवाप्येति । यो भास्वतीमेवास्तमेति, नागमेवाप्येति । यो नागमेवास्तमेति, विज्ञानमेवाप्येति । यो विज्ञानमेवास्तमेति, आनन्दमेवाप्येति । य आनन्दमेवास्तमेति, तुरीयमेवाप्येति । यस्तुरीयमेवास्तमेति, तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येतीति होवाच ॥

य एवं निर्बीजं वेद, निर्बीज एव स भवति । न जायते, न

निर्बीजत्वेन परमात्मनिर्देशफलं दर्शयति य एवं निर्बीजमिति । निर्बीज एवेति । जन्मप्रबन्धहेतुपुण्यपापरहित एव भवतीत्यर्थः । एवञ्च जन्माभावे तदनुपक्ता अन्येऽपि विकारा नावकाशं लभन्त इत्याह न जायते न म्रियत इति । न भिद्यत इत्यादि च, 'अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च' इति गीतम् । निरवयवत्वादसौ

म्रियते, न मुह्यते, न भिद्यते, न दह्यते, न छिद्यते, न कम्पते, न कुप्यते, सर्वदहनोऽयमात्मेत्याचक्षते ।

नैवमात्मा प्रवचनशतेनापि लभ्यते, न बहुश्रुतेन, न बुद्धिज्ञानाश्रितेन, न मेधया, न वेदैर्न यज्ञैर्न तपोभिरुग्रैर्न सांख्यैर्न योगैर्नाश्रमै । नान्यैरात्मानमुपलभन्ते । प्रवचनेन प्रशंसया व्युत्थानेन तमेतं ब्राह्मणाः शुश्रुवांसोऽनूचाना उपलभन्ते । शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति । सर्वस्यात्मा भवति, य एवं वेद ॥

इति सुबालोपनिषदि नवमः खण्डः ॥

न केनापि भूतेन प्रविश्य नाश्यतेति । सर्वदहन इति । 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते' इति प्रपञ्चहेतुकर्मदाहिज्ञानभासुर इत्यर्थः । पञ्चदशखण्डे वक्ष्यमाणं सर्वदहनत्वमपि द्रष्टव्यम् ।

परमात्मलाभोपायत्वेन प्रमाणप्रतिपन्नानां वैराग्याभावे अनुपायत्वमाह नैवमात्मा प्रवचनशतेनापीत्यादिना । "नायमात्मा प्रवचनेन" 'न वेदयज्ञाध्ययनैर्न दानैः' इत्यादिस्थल इव इहार्थो भाव्यः । एवमात्मा = एवम्भूत आत्मा। प्रवचनपदेन अध्यापनविवक्षायाम् बुद्धिज्ञानाश्रितपदेन मननग्रहणम्, व्यत्यासो वा । बुद्धिः मनसो निरूपणसामर्थ्यम् । ज्ञानं तदधीनो विवेकः । तदाश्रितमालम्बनसंशीलनादीति वा । मेधा ध्यानम् । सांख्यं ज्ञानयोग । योगे. कर्मयोगै । अन्यैः दानहोमादिभिः । आवश्यक परिकर उच्यते व्युत्थानेनेति । "पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय" इति प्रयोगान् व्युत्थानं यथार्हं वैराग्यम्, न पुनः योगात् व्युत्थानम् । सत्यस्मिन् पूर्वोक्तप्रवचनादिकमपि सहकारीति ज्ञापयितुम् प्रवचनेनेति । इदमुक्तसर्वोपलक्षणम् । प्रशंसा उत्तमश्लोक-

॥ अथ दशम खण्ड ॥

अथ हैन रैक पप्रच्छ—भगवन्! कस्मिन् सर्वे संप्रतिष्ठिता भवन्तीति। रसातललोकेष्विति होवाच। कस्मिन् रसातललोका ओताश्च प्रोताश्चेति। भूर्लोकेष्विति होवाच। कस्मिन् भूर्लोका ओताश्च प्रोताश्चेति। भुवर्लोकष्विति होवाच। कस्मिन् भुवर्लोका ओताश्च प्रोताश्चेति। सुवर्लोकेष्विति होवाच। कस्मिन् सुवर्लोका ओताश्च प्रोताश्चेति। महर्लोकेष्विति होवाच। कस्मिन् महर्लोका ओताश्च प्रोताश्चेति। जनोलोकेष्विति होवाच। कस्मिन् जनोलोका ओताश्च प्रोताश्चेति। तपोलोकेष्विति होवाच। कस्मिन् तपोलोका ओताश्च प्रोताश्चेति। सत्यलोकेष्विति होवाच। कस्मिन् सत्यलोका ओताश्च प्रोताश्चेति। प्रजापतिलोकेष्विति होवाच। कस्मिन् प्रजापतिलोका ओताश्च प्रोताश्चेति। ब्रह्मलोकेष्विति होवाच। कस्मिन् ब्रह्मलोका ओताश्च प्रोताश्चेति।

गुणानुवादादि। व्युत्थायेति निषिद्धवर्जनस्य सर्वस्योपलक्षणम्। तद्विम्रियते शान्त इत्यादिना। आत्मन्येव देह एव। न हि देहाभावे आत्मा द्रष्टुं शक्यते। आत्मनि जीवात्मनि इति वा। एतद्दर्शन फलमाह सर्वस्यात्मा भवति य एवं वेदेति। वेद, पश्यतीत्यर्थः।

॥ इति उपनिषद्भाष्यपरिष्कार सौबालनवमखण्डपरिष्कारः ॥

नमस परस्तात् परमात्मप्राप्त्या निर्णीतमनन्तरखण्डे वक्ष्यन् तम प्रकृतिकेऽस्मिन् प्रपञ्चे सर्वस्य लोकस्य तादृशपरमात्मैकप्रतिष्ठितत्वमिह प्राह। तेन सर्वस्य हेयत्वम्, सर्वातिक्रमणेनान्यत्र नयनसमर्थत्वादि तस्य च ज्ञापित भवति। तथा षष्ठे यत् आरब्धम्, अमूलमनाधारम् इति, तत्र अमूलत्वं तेन खण्डेन सर्वोत्पत्तिकारणत्वबोधिना,

सर्वलोका आत्मनि ब्रह्मणि मणय इवोताश्च प्रोताश्चेति। स होवाच-- एवमेतान् लोकान् आत्मनि प्रतिष्ठितान् वेद, आत्मैव स भवति। इत्येतन्निर्वाणानुशासनम्। इति वेदानुशासनम् इति वेदानुशासनम्॥

इति सुबालोपनिषदि दशमः खण्डः॥

॥ अथैकादशः खण्डः॥

अथ हैनं रैक्वः पप्रच्छ-भगवन्! योऽयं विज्ञानघन उत्क्रामन्, स केन कतरद्वाव स्थानमुत्सृज्यापक्रामतीति। तस्मै स होवाच — हृदयस्य मध्ये लोहितं मांसपिण्डम्, यस्मिंस्तद्दहरं पुण्डरीकं कुमुदमिवानेकधा विकसितम्। तस्य मध्ये समुद्रः। समुद्रस्य मध्ये कोशः। तस्मिन् नाड्यश्चतस्रो भवन्ति रमाऽरमेच्छाऽपुनर्भवेति। तत्र रमा पुण्येन

अव्यवहितपूर्वखण्डेन च लयहेतुत्वबोधिना विवृतमासीत्। अनाधारत्वं तु विवरीतुमयं खण्डः। अनेन अनन्तरखण्डवक्ष्यमाणापुनर्भवाख्य-नाडीव्यतिरिक्तनाडीप्राप्याश्चानित्या लोका अधिगमिता भवन्तीति।

सत्यलोकपदेन चतुर्मुखस्य तत्पुत्राणां प्रजापतीनाञ्च स्थानात् अन्यस्य तदधीनप्रजावासभूतस्य सत्यलोकांशस्य ग्रहणम्। मणय इवेति। सूत्रे इति शेषः। तथा च गीयते, 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति। ओताश्च प्रोताश्चेति पूर्णव्याप्तिकथनम्।

॥ इति उपनिषद्भाष्यपरिष्कारे सौबालदशमखण्डपरिष्कारः॥

पञ्चमखण्डस्यानाधारस्य नारायणस्य चक्षुराद्यन्तर्यामितयोपासनानि उपवर्ण्य, पूर्वखण्डदर्शितसर्वलोक- तन्मूलप्रकृतिमण्डलातीतस्य षष्ठखण्डसंदर्शितस्य स्थानस्य प्राप्तिरूपमुपासनफलं वक्तुं गतिप्रकारं दर्शयितुमारभते अथ हैनमिति। नाड्यश्चतस्रो नाम्ना निर्दिशति रमेत्यादिना। तत्तन्नाडीद्वारा प्राप्यं स्थानमाह तत्र रमेत्यादिना। अत

पुण्यं लोकं नयति । अरमा पापेन पापम् । इच्छया यत् स्मरति, तदभिसम्पद्यते । अपुनर्भवया कोशं भिनत्ति । कोशं भित्त्वा शीर्षकपालं भिनत्ति । शीर्षकपालं भित्त्वा पृथिवीं भिनत्ति । पृथिवीं भित्त्वाऽपो भिनत्ति । अपो भित्त्वा तेजो भिनत्ति । तेजो भित्त्वा वायुं भिनत्ति । वायुं भित्त्वाऽऽकाशं भिनत्ति । आकाशं भित्त्वा मनो भिनत्ति । मनो भित्त्वा भूतादिं भिनत्ति । भूतादिं भित्त्वा महान्तं भिनत्ति । महान्तं भित्त्वाऽव्यक्तं भिनत्ति । अव्यक्तं भित्त्वाऽक्षरं भिनत्ति । अक्षरं भित्त्वा मृत्युं

एवमन्वर्थानि नामानि । मोक्षार्थोपासनस्यैव प्रकृतत्वात् अपुनर्भवाख्यनाडीसाध्यगतिमेव विस्तरेण विवक्षुः तत्राप्युपनिषदन्तराधिगतादर्थादतिरिक्तमाह अपुनर्भवयेत्यादिना । कोशं — हृदयकोशम् । पृथिवीं भिनत्तीत्यादेः ब्रह्माण्डावरणभूताण्डकटाहतदावरणसमष्टिसलिलादिभेदनपरत्वं कार्याधिकरणश्रुतप्रकाशिकायामुक्तम् । अतः शीर्षस्थकपालभेदनात् परं आवरणपृथिवीभेदनात् पूर्वम् अर्चिरादिभिरब्जयोनिपर्यन्तैः स्वस्वस्थाने अतिवाह्यमानत्वमप्यन्यश्रुतिशतश्रावितमत्रसंधेयम् । मनो भिनत्तीति । आकाशभेदन—भूतादिरूपाहङ्कारभेदनमध्यपाठात् स्थानात् मनश्शब्दः शब्दतन्मात्रपरः । इन्द्रियाणि तन्मात्रेष्विति प्रागुक्तरीत्या तत्र सृष्ट्यारम्भे प्रलये च मनआदीन्द्रियसंसर्गात् मनःपदेन तदुक्तिः । न च तन्मात्रस्य आवरणभावे किं प्रमाणमिति वाच्यम्—अनेनैव वचनेन आवरणत्वानुमानात् । अनावरणत्वेऽपि आकाशकारणत्व-अहङ्कारकार्यत्वसद्भावमात्रेणापि तद्भेदनकथनोपपत्तेः । अस्तु वा सात्त्विकाहङ्कारो मनःपदविवक्षितः । आकाशकारणत्वस्य तत्राभावेऽपि, तत्कारणत्वस्य भूतादावभावेऽपि च तत्तदंशभेदनक्रमविवक्षया एवमुपवर्णनसंभवात् । मृत्युमिति तमसो

भिनत्ति । मृत्युर्वै परे देव एकीभवतीति परस्तान्नसन्नासन्नसदसत् ।
इत्येतन्निर्वाणानुशासनम् । इति वेदानुशासनम् इति वेदानुशासनम् ॥

इति सुबालोपनिषदि एकादशः खण्डः ॥

विवक्षेत्यपि स्थानप्रमाणादवगतमेव । न चाविनाश्यस्यामेयस्य तमसः कथं भेदनमिति वाच्यम् । अप्रतिघातिद्रव्याणां भेदनस्यानपेक्षिततया तत्तदतिक्रमस्यैव तत्तद्भेदनपदविवक्षितत्वात्, भिनत्ति—स्ववियुक्तं करोतीति सर्वत्रार्थः ।

मृत्युभेदनानन्तरं किमिति जिज्ञासायां परस्तान्नसदित्यादि वक्ष्यन्, कथं मृत्युभेदनानन्तरमन्यस्य भेदनं नास्तीति शङ्कानुन्मेषाय, यस्मात् मृत्योः कारणमन्यन्नास्ति, मृत्योः परे देवे एकीभावात्, तस्मात् तदुपरि भेदनीयं न किञ्चिदिति ज्ञापयितुमाह मृत्युर्वै इति । वैशब्दः, 'तम परे देव एकीभवति' इति प्रागुक्त हीति प्रसिद्धिं दर्शयति । अत्र, 'मृत्योः परे' इति प्रथमखण्डभाष्ये अनुवादः तत्रतत्र, अपुनर्भवाय कोशमिति चतुर्थ्यन्तानुवादवत् लेखकप्रमादकृत इति ध्येयम् । परस्तादिति । मृत्योरुपरीत्यर्थः । अत्र परस्तादित्यस्य एकीभावानन्तरमिति नार्थः । एकीभावस्य प्रकरणार्थत्वाभावात् । एकीभवतीति इतिशब्देन तस्य हेतुत्वेन समर्पितत्वाच्च । मृत्युभेदानानन्तरमित्यर्थस्तु अनन्वयात् नेष्यते । न हि मुमुक्षोरुत्क्रान्तस्य मृत्युभूतप्रकृत्यतिक्रमरूपभेदनात् पश्चात् सदसदादिविलक्षणमेवेह प्रकृतिमण्डलेऽस्ति । तस्य मुक्तिभागित्वेऽपि प्रपञ्चस्य सद्भावेन प्रलय इव तावन्मात्रस्थितिकथनायोगात् । अतः, 'दिग्देशकालेष्वस्ताति' इति देशेऽपि स्मरणात् देशपरोऽयमस्तातिः । तत्र मृत्युभेदनादुपरि देश इत्यर्थायोगात् मृत्युदेशादुपरीत्यर्थ आश्रयितव्यः । यद्यपीह, 'नसन्नासन्नसदसत्' इत्यनेन प्रकृतिप्राकृतप्रपञ्चरूपसृष्टिप्रलयगोचर—कार्यकारणभावापन्नलीलाविभूतिविलक्षणो भोगविभूतिरूपो देशो विव-

॥ अथ द्वादशः खण्डः ॥

ओं नारायणाद्वा अन्नमागतं पक्वं ब्रह्मलोके महासंवर्तके पुनः

क्षितुं युक्तः—अथापि पूर्वम्, 'तस्मात् तमः संजायते' इति नसदित्याद्युक्तस्य तमआविर्भावापादानत्वकथनात् नसदादिपदेन परमात्मविवक्षा अवर्जनीयेति ध्येयम्। नित्यविभूतिविशिष्टपरमात्मपरत्वमस्तु इति चेत्—काममस्तु। परस्तादिति वाक्ये द्वितीयखण्ड इव अस्तीत्यध्याहारं विहाय, प्राप्नोतीति वा प्राप्यत इति वाऽध्याहारे तु परस्तादित्यस्य मृत्युभेदनानन्तरमित्यर्थः स्यात्।

॥ इति उपनिषद्भाष्यपरिष्कारे सौबालैकादशखण्डपरिष्कारः ॥

एवं जगज्जन्मस्थितिध्वंसहेतुर्नारायणाख्यं सर्वान्तरं परं तत्त्वम्, तदुपासनम्, तत्फलञ्च मृत्युपर्यन्तं स्थानमुत्सृज्यापक्रम्य तदुपरितनदेशविशेषप्राप्तिरूपमुपवर्णितमिति, वक्तव्यं सर्वमुक्तमेव। अतोक्तांशान्तर्भूतमेव किञ्चित् विशदीक्रियते, यथा गीतासु द्वादशाध्यायपर्यन्तोक्तमर्थजातमेव परैरध्यायैः तथा, ओं नारायणाद्वा इत्यादिना [प्रतिखण्डमश्रूयमाणस्य प्रणवस्यात्र परं श्रवणात् उक्तार्थस्यैव पुनर्विशदीकरणार्थमारम्भ इति व्यज्यते। अथवा ओमिति उक्तोपासनमन्त्रनिर्देशः। वक्ष्यते हि मन्त्रं पदमिति। अथवा ओमिति चतुर्दशखण्ड इव स्थितं न श्रुत्यानुपूर्वीनिविष्टमित्यस्तु।] अत्र खण्डे यथाचितोपनतेन देहधारणं कार्यमित्युपदिश्यते। व्युत्थानेन तमेनमुपलभन्ते इति प्रागुक्तम्। पुत्रवित्तादिकं परित्यक्तवतो देहधारणस्याप्यशक्यत्वे स्थिते कथं परमात्मानुभवः? कथं वा साक्षात्कारपर्यन्ततदुपलम्भप्रसक्तिरित्यत्र यथाचितोपनतेन वर्तमान उपलभेतेत्युच्यत इह। 'यः सर्वज्ञः सर्ववित् तस्मादेतद् ब्रह्म नामरूपमन्नञ्च जायते', 'तस्माद्वा एतस्मादात्मनः ओषधीभ्योऽन्नम्' इत्युक्तरीत्या नारायणस्वरूपमेव अन्नं प्राप्तं वस्तु तन्नाभिकमलोद्भवेन चतुर्मुखेन

पकमादित्ये पुनः पक्वं क्रव्यादि पुनः पक्वं जालकिलक्लिन्नं पर्युषितं पूतमन्नमयाचितमसंक्लृप्तमश्नीयात् ; न कञ्चन याचेत ॥

॥ इति सुबालोपनिषदि द्वादशः खण्डः ॥

॥ अथ त्रयोदशः खण्डः ॥

बाल्येन तिष्ठासेत् । बालस्वभावोऽसङ्गो निरवद्यो मौनेन पाण्डि-

व्यष्टिपृथिव्यादिसृष्टिकाले पक्वं जीवजातभोगार्हं कृतम् । अथ चतुर्मुखपुत्रे रुद्रे पक्वम् । रुद्र एव महासंवर्तकः । संपूर्वकस्य वृतुधातोः प्रलयोऽर्थः । समित्येकीभावे । प्रलयकारिषु यमादिषु रुद्रो महानिति स महासंवर्तकः । तस्य चतुर्मुखप्रसादलब्धाष्टमूर्त्यैश्वर्यतया पञ्चभूतात्मकतन्मूर्त्यन्तर्गतत्वादन्नस्य, तस्मिन् अस्य पक्वता । अथ भूतपञ्चकचन्द्रादित्ययजमानरूपरुद्रमूर्तिनिविष्टत्वादादित्यस्य, 'आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः' इति अन्नहेतुत्वात् पुनस्तत्र तस्य पक्वता । क्रव्यात्=राक्षसः मांसभुक् हिंसकः। तस्मिन् पक्वत्वञ्च सर्वस्य भगवदर्थत्वविवेकविकलैर्दस्युसंप्रदायिभिः वातोपरिकल्पात्वात्। एवम्भूतमिदमन्नं यथा सृष्ट्यारम्भकालप्रभृतिपक्वत्वेऽपि पर्युषितमिति नोपेक्ष्यते, तथा मनुष्यपक्वमपि यातयामं पर्युषितमपि पर्युषितत्वदोषेणोपेक्ष्यं न भवति। तत् जालकिलक्लिन्नं चेत्, पूतं भवति। जलसमूहो जालम् । तत्र किलं किरं कीर्यमाणं सत् क्लिन्नं क्लेदभाक् विशीर्णविस्यमित्यर्थः । अर्थान्तरं वा निचार्यम्। असंक्लृप्तम्। इदं मे भविष्यतीति वा, भवत्विति वा अनुद्दिष्टं यदृच्छया केनचित् कारुणिकेन आनीय समर्पितमश्नीयात् । वैराग्येण सर्वं त्यक्तवतो देहधारणार्थं गृह्यमाणमिदमेव श्रेयस्करम्; न तु याचेतेति ।

॥ इति उपनिषद्भाष्यपरिष्कारे सौबालद्वादशखण्डपरिष्कारः ॥

देहधारणार्थं कर्म कथितम् । मनःपरिपाकहेतुः कर्म कथ्यते ।

त्येन निरधिकारतयोपलभ्येत । कैवल्यमुक्तं निगमनं प्रजापतिरुवाच । महत् पदं ज्ञात्वा वृक्षमूले वसेत् कुचेलोऽसहाय एकाकी समाधिस्थ आत्मकाम आप्तकामो निष्कामो जीर्णकाम । हस्तिनि सिंहे दंशे

बाल्येन तिष्ठासेदिति न कामचारवादभक्षत्वाभ्यनुज्ञानम् ; किं तु माहात्म्यानाविष्कारः । न दम्भराहित्यमात्रम् ; किं तु स्वमहिमगोपनमपि । तदाह बालस्वाभावोऽसङ्गो निरवद्य इति । "बाल्यं च पाण्डित्यञ्च निर्विद्याथ मुनिः" इत्युक्तत्रये शिष्ययोरपि कथनं मौनेन पाण्डित्येनेति । मौनं नाम मुनित्वम् — ध्यानव्यतिरिक्तकालेऽपि आलम्बनभूतस्य भगवद्रूपस्य सगुणस्य पौनःपुन्येन संशीलनम् । पाण्डित्यञ्च श्रवणमननाभ्यां यथावदधिगतपरतत्त्वेन पुंसा आप्तोपदेशादुपास्यार्थपरिच्छेदः । मौनेन पाण्डित्येनेति इत्थम्भूतलक्षणे तृतीया । मौनपाण्डित्यविशिष्टोऽपि बालस्वभावो निरधिकार इवोपलभ्येतेति बालस्वरूपं विवृतं भवति । कैवल्यमुक्तं निगमनं प्रजापतिरुवाचेति । यदिदमुक्तं कैवल्यम् असङ्गत्वादिरूपम्, तदेव निगमनम् अवसानभावि, 'अमौनं मौनञ्च निर्विद्याथ ब्राह्मणः' इत्युक्तब्रह्मोपासननिष्पादकं प्रजापतिरुवोचदित्यर्थः । अत उपासनमेव कार्यमेवमित्याह महत् पदमिति । 'सर्वे वेदा यत् पदमामनन्ति' इति प्रसिद्धम् ओमित्येतत् पदं सार्थमधिगम्य वृक्षमूले वसेत् । न तु स्थिरं कुटीरमपेक्षेत । कुचेलः वस्त्रपरिष्करणानादरः । असहायः—द्वितीयसद्भावे तदर्थकार्यवैयग्र्यादिना समाधिप्रतिहतिः स्यादिति । सहायत्वेन अक्लृप्तपुरुषान्तरसाहित्यमपि न युक्तमित्याह एकाकीति । 'एकस्तरः' इति श्रूयते । आत्मकामः आत्मप्राप्तिकामः आप्तकामः सञ्जातात्मानुभवः निष्कामः वस्त्वन्तराभिलाषोत्पत्तिरहितः जीर्णकामः प्रागुत्पन्नकामनानाशवान् । अथ निर्भयत्वमुच्यते हस्तिनीत्यादिना । अननुभाव्यवस्तुविषये वैराग्यो-

मशके नकुले सर्पराक्षसगन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति कुतश्च नेति । वृक्षमिव तिष्ठासेत् ; छिद्यमानोऽपि न कुप्येत, न कम्पेत । उत्पलमिव (उपलमिव ?) तिष्ठासेत् ; छिद्यमानोऽपि न कुप्येत न कम्पेत । आकाशमिव तिष्ठासेत् ; छिद्यमानोऽपि न कुप्येत न कम्पेत । सत्येन तिष्ठासेत । सत्योऽयमात्मा ।

सर्वेषामेव गन्धाना पृथिवी हृदयम् , सर्वेषामेव रसानामापो हृदय सर्वेषामेव रूपाणा तेजो हृदय सर्वेषामेव स्पर्शाना वायुर्हृदय सर्वेषामेव शब्दानामाकाश हृदय सर्वेषामेव (सर्वासामेव?) गतीनाम व्यक्तं हृदयं सर्वेषामेव सत्त्वाना मृत्युर्हृदयम् । मृत्युर्वै परे देव एकीभवतीति । परस्तान्नसन्नासन्नसदसत् । इत्येतन्निर्वाणानुशासनम् । इति

त्पत्तावपि प्रसक्तदुःखपरिहारकामना ह्यवर्जनीयेत्यत्राह हस्तिनीत्यादि। वृक्षं वृश्च्यमान काष्ठम । आर्षं वा ह्रीवत्वम् । परमात्मैकनिमग्नमनस्को हि प्रह्लाद इव प्रबल पीडितोऽपि न दु खमनुभोक्ष्यते । तस्योचितानुचितसंघटनविघटने हि परमात्मनि आयतेते इति भगवत्यध्यवसायस्य द्रढिमा। तदाह सत्येन तिष्ठासेदिति । 'एष तु वा अतिवदति य. सत्येनातिवदति' इत्यत्रेव सत्यमिह ब्रह्म । सत्योऽय मात्मा । भगवति निक्षिप्तभरोऽयमात्मा तद्रक्षितो न विनश्यति ; सत्य एवावतिष्ठत इत्यर्थः ।

जातु दस्यादिभूताधीनदेहवियोगापत्तावपि मृत्युमण्डले तस्यावर्जनीयत्वात् आत्मन. सत्यस्याविनष्टतया च न खेदप्रसक्तिरित्याशयेनाह सर्वेषामेवेति । गन्धादीना यथा पृथिव्यादिराधार , तथा मृत्युशब्दवाच्यं तम एव तत्कार्यदेहभाजां सत्त्वानां प्राणिनामाधारभूतम । तस्य च परमात्मना एकीभावोऽपि भवतीति अवर्जनीयः

वेदानुशासनम् ॥ इति वेदानुशासनम् ॥

॥ इति सौबालोपनिषदि त्रयोदश खण्ड ॥

॥ अथ चतुर्दश खण्ड ॥

ओं पृथिवी वान्नमापोऽन्नादा आपो वान्न ज्योतिरन्नाद ज्योतिर्वान्न वायुरन्नादो वायुर्वान्नमाकाशोऽन्नाद आकाशो वान्नमिन्द्रियाण्यन्नादानि । इन्द्रियाणि वान्न मनोऽन्नाद मनोवान्नं बुद्धिरन्नादा बुद्धिर्वान्नमव्यक्तमन्नादमव्यक्त वान्नमक्षरमन्नादमक्षर वान्न मृत्युरन्नाद । मृत्युर्वै परे देव एकीभवतीति । परस्तान्नसन्नासन्नसदसत् । इत्येतन्निर्वाणानुशासनम् । इति वेदानुशासनम् इति वेदानुशासनम् ॥

॥ इति सुबालोपनिषदि चतुर्दश खण्ड ॥

सारनाश । मृत्यो परस्तात्तु परमपदे नैवमिति भाव ॥

॥ इति उपनिषद्भाष्यपरिष्कारे सौबालत्रयोदशखण्डपरिष्कार ॥

चतुर्दशे खण्डे, सत्त्वाना मृत्यौ लय शरीरस्य पाञ्चभौतिकत्वात् भूम्याद्यैव भवतीति व्युत्पादनार्थं पूर्वोक्तप्रलयप्रक्रियैवानूद्यते । इन्द्रियाणीति शब्दत मात्रग्रहणम् । मन इति अहंकारस्य बुद्धिरिति महत. ।

॥ इति उपनिषद्भाष्यपरिष्कारे सौबालचतुर्दशखण्डपरिष्कार ॥

मुमुक्षुर्निष्पन्नोपासन किं पाञ्चभौतिकदेहलयस्थानभूतपृथिव्यादिलये क्रमेण तत्पर्यन्त जाते पश्चादेव मुक्तो भवति, किं वा चरमशरीरप्रहाणसमनन्तरमेवेति   अयम सर्वतिपादक पूर्वखण्डानुसारेण विशये जाते, अस्त्येव सत्सु वस्तुषु ज्ञानाग्निदग्धकर्मणेऽकर्मतया कर्मायत्तसर्वचेतनद्रव्यदाहिसामर्थ्यसत्त्वसाम्य विषये सर्वं दग्धबीजप्रायमङ्कुरोच्छेदासमर्थं भवतीति व प्रारब्धकर्मावसानक्षण-

॥ अथ पञ्चदशः खण्डः ॥

अथ हैनं रैकः पप्रच्छ–भगवन् योऽयं विज्ञानघन उत्क्रामन्, स केन कतरद्वाव स्थानं दहतीति । तस्मै स होवाच–योऽयं विज्ञानघन उत्क्रामन्, प्राणं दहत्यपानं व्यानमुदानं समानं वैरम्भं मुख्यमन्तर्यामं प्रभञ्जनं कुमारं श्येनं श्वेतं कृष्णं नागं दहति । पृथिव्यापस्तेजोवाय्वाकाशं दहति । जागरितं स्वप्नं सुषुप्तं तुरीयं च महतां च लोकं परं च लोकं दहति । लोकालोकं दहति । धर्माधर्मं दहत्यभास्करममर्यादं निरालोकमतः परं दहति । महान्तं दहत्यव्यक्तं दहत्यक्षरं दहति । मृत्युं दहति । मृत्युर्वै परे देव एकीभवतीति । परस्तान्नसन्नासन्नसदसत् । इत्येतन्निर्वाणानुशासनम् । इति वेदानुशासनम् इति वेदानुशासनम् ॥

॥ इति सुबालोपनिषदि पञ्चदशः खण्डः ॥

भाविमोक्षप्रतिबन्धं दग्धुमुपपादयितुं पञ्चदशः खण्डः प्रारभ्यते । केन कतरदिति । सर्वदाहित्वे संमन्यमाने विद्यामाहात्म्येन दहतीति कारणं सुज्ञानम् । कतिपयमात्रदाहित्वे तु तदुचितं कारणान्तरं विमृश्यं स्यादिति कृत्वा प्रश्नवाक्ये केनेत्यस्य घटनम् । एतत्सूचनार्थैव योऽयं विज्ञानघन इति विशेषनिर्देशः । सर्वदाहित्वात् विद्यामाहात्म्यरूपकारणस्य विज्ञानघन इत्यत एव विज्ञानसंभवात् न कारणं निर्देष्टव्यमस्तीति उत्तरवाक्यमध्ये केनेत्येतदुत्तरघटनोपेक्षणमिति ध्येयम् । प्राणमिति । प्राणापानादयः चतुर्दश वायुविशेषाः प्रागुक्ता एव । दहतीत्यस्य स्थितमपि कार्याक्षमं करोतीत्यर्थः । पृथिव्यापस्तेज इत्यत्र पृथिव्यप्तेज इति पाठः स्यात् । छान्दसो वा प्रयोगः । क्रिया-पदान्तरस्याऽऽनुषक्तत्वात् । लोकालोकम्—भास्करकिरणसापेक्षप्रकाशो क्रियदंशो, किञ्चिदंशे च तदनपेक्षं स्थानम् । अभास्करमित्या-

॥ अथ षोडशः खण्डः ॥

सौबालबीजब्रह्मोपनिषत् नाप्रशान्ताय दातव्या ; नापुत्राय, नाशिष्याय ; नासंवत्सररात्रोषिताय । नापरिज्ञातकुलशीलाय दातव्या ; नैव च प्रवक्तव्या ।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मन ॥

दिना अहङ्कारपर्यन्तसमष्टिग्रहणम् ॥

॥ इति उपनिषद्भाष्यपरिष्कारे सौबालपञ्चदशखण्डपरिष्कारः ॥

एतदुपनिषद्विद्यायाः परतत्त्वस्वरूप - प्रतितत्त्वभूतदहरात्म-मायादिविस्पष्टदर्शित्वात् परमं गोपनीयत्वमुच्यते षोडशे खण्डे । सौबालबीजब्रह्मोपनिषत् सौबालश्रुत्यन्तमूलकब्रह्मविद्या । अपुत्राय अशिष्याय पुत्रशिष्यव्यतिरिक्ताय । असंवत्सररात्रोषिताय संवत्सर-संख्याकदिनगणकृतगुरुकुलवासपुरुषव्यतिरिक्ताय । दातव्या प्रथममुपदेष्टव्या, प्रवक्तव्या अर्थविशदीकरणेन चिन्तनार्थमुपपादयितव्या न ।

यस्य देव इति मन्त्रः श्वेताश्वतरीयेऽपि । देवे 'दिव्यो देव एको नारायणः' इति प्रागुक्ते एकस्मिन् अमद्गुरुदेवभावे जगद्व्यापारलीले श्रीमन्नारायणे । यथा देवे तथा गुरौ । 'साक्षान्नारायणो देवः कृत्वा मर्त्यमयीं तनुम् । मग्नान् उद्धरते लोकान् कारुण्यात् शास्त्रपाणिना' इत्युक्तरीत्या देवो नारायण एव गुरुरूपेणावतीर्णः । देवो देवत्वावस्थायां क्रोधादपि किञ्चित् कुर्यात्, शार्ङ्गेण च पातयेत् घातयेच्च । अस्यां पुनरवस्थायां कारुण्यादेव करोति शास्त्रेण पाणिना भवपारावारमग्नान् उद्धरति चेति अतिशयितोऽपि गुरुष्वेव भक्तिरत्र । एवं सति तादृशी या भक्तिः कथं न युक्तेति । एते कथिताः—पञ्चदशभिः खण्डैः कथिताः । गुरुभक्तिविरहितस्य तु कथिता अप्यर्थाः न प्रकाशन्ते ।

इत्येतन्निर्वाणानुशासनम् । इति वेदानुशासनम् इति वेदानुशासनम् ॥

॥ इति सुबालोपनिषदि षोडशः खण्डः ॥

[ओं पूर्णमदः—इति शान्तिः]

॥ इति शुक्लयजुर्वेदीया सुबालोपनिषत् ॥

॥ श्रीरस्तु ॥

एते ह्यकथिता इति पदच्छेदे,—गुरुभक्तिरस्ति चेत्, तदनुग्रहेण अकथिता अप्यर्थाः स्वतः प्रकाशन्त इत्यर्थः । महात्मन इति । 'वासुदेवः सर्वमिति स महात्मा सुदुर्लभः' इति गीतम् । वासुदेव इव गुरावपि तादृग्भक्तिशाली तु मुख्यो महात्मेति भावः । अस्मिन् पूर्वं विद्यागोपनस्य पश्चात् गुरुभक्तिप्रकर्षस्य चावश्यकत्वोपदेशात्; 'गुरुं प्रकाशयेद् धीमान् मन्त्रं यत्नेन गोपयेत्' इतीदमीदृशश्रुत्युपबृंहणमेवेति विज्ञेयम् ॥

गुरुणोभयमीमांसावल्लभत्वेन मानितः ।
यः पूर्वोत्तरमीमांसाप्रदीपस्तर्कवारिधिः ॥
विहितानेकसद्ग्रन्थो वात्स्यः श्रीवीरराघवः ।
तेन वेदान्तसौमित्रिमुनिपादाब्जसेविना ॥
श्रीरङ्गरामावरजमुनिसेवात्तसद्धिया ।
ईशाद्युपनिषद्भाष्यपरिष्कारविधायिना ॥
प्राच्यव्याख्यानपञ्चांशा सौबालोपनिषत् परा ।
इत्थं षोडशखण्डात्मा परिष्कारेण भूषिता ॥
अनपायदयाम्भोधिरच्छस्फटिकसप्रभः ।
अस्तु लक्ष्मीहयग्रीवो देवस्तुष्टो गतिः सताम् ॥

इति श्रीवात्स्यसच्चक्रवर्तिवीरराघवाचार्यकृतिषु
उपनिषद्भाष्यपरिष्कारे सौबालपरिष्कारः सम्पूर्णः ॥

॥ शुभमस्तु ॥

सुबालोपनिषदर्थसंग्रहकारिकाः

सुबालोपनिषत् शुक्लयजुर्वेदे क्वचित् स्थिता ।
एषा षोडशखण्डात्मा वक्ति नारायणं परम् ॥ १ ॥
नसन्नासन्नसदसत् प्रलये वस्तु तद्वचः ।
समष्टिर्व्यष्टयो ब्रह्मा वर्णाश्चाऽऽद्य ईरिताः ॥ २ ॥
वेदवैदिकवाक्सृष्टिर्यत् किञ्च मिथुनोद्भवम् ।
तत्सृष्टिश्च द्वितीयोक्ता लयक्रमसमन्विता ॥ ३ ॥
तृतीये तस्य चिदचिद्वैलक्षण्यविभावके ।
षडङ्गसाध्यमुदितं मुक्तये तदुपासनम् ॥ ४ ॥
जाग्रत्स्वप्नसुषुप्त्युक्त्या ततो वैराग्यवर्धनम् ।
चक्षुरादीनि करणान्युपादाय चतुर्दश ॥ ५ ॥
प्रत्येकमष्टके प्रोक्तं ध्यानं तस्याऽऽत्मनस्ततः ।
नारायणस्य चाशेषं परमञ्च पदं ततः ॥ ६ ॥
शरीरात्मत्वरूपोऽर्थः सप्तमे साम्प्रदायिकः ।
एवं सर्वशरीरित्वेऽप्यनवद्यत्वमष्टमे ॥ ७ ॥
उपासिते लयोऽथोक्तो निर्बीजे विलयात्मकः ।
दशमेऽस्मिन् अनाधारे सर्वाधारत्वमीरितम् ॥ ८ ॥
अपुनर्भवया नाड्या मुक्तिदेशगतिस्ततः ।
वृत्तिस्त्वयाचितेनाथ निष्ठा सा बाल्यधैर्यतः ॥ ९ ॥
मुक्तत्यक्तशरीरादि प्राप्य भूतादिकृताम् ।
अस्या लयादिति व्यक्त्यर्थं अन्तरादि लयक्रमः ॥ १० ॥
स्वबन्धने जगत् सर्वं क्षीणशक्ति निरञ्जनः ।
मुक्तिः पञ्चदशे प्रोक्ता गुप्तिर्भक्तिश्च षोडशे ॥ ११ ॥
सौबाले स्वात्मनत्यकार्यचित्तत्वं शरीरता ।
नारायणस्य पारम्यं बाल्यतत्त्वादि चोदितम् ॥ १२ ॥

—:**:—

सुबालोपनिषद्विषयसूची

तमःप्रभृति प्रादुर्भाववर्णनम् 601
तन्मात्रभूतसृष्टिप्रकारपरामर्शः 605
'अष्टौप्रकृतयः षोडशविकाराः' इत्येतदर्थशोधनम् 608
अण्डद्वैधब्रह्मसृष्ट्यादि 613 मृत्युसृष्टिः 615
सर्गप्रपञ्चनम् 618 प्रलयक्रमनिरूपणम् 620–524
इन्द्रियाणि तन्मात्रेष्वित्येतदर्थशोधनम् 624–632
कारणस्य निर्मलस्वरूपनिरूपणम् 633
उपासनाङ्गपरिगणनम् 636 साङ्गोपासनफलवर्णनम् 638
उपासिसिषोपजननाय जागरावस्थादिवर्णनम् 641
हृदयपुण्डरीकवर्णनादि 641 स्वप्नावस्थावर्णनम् 644
हितानामकनाड्यादिवर्णनम् 648
अध्यात्मादिगततया नाड्यादिगततया च परमात्मोपासनम् 653-660
भगवद्गुणमाहात्म्यादिवर्णनम् 660-671
नारायणस्योपास्यता तत्स्थानस्य प्राप्यता च 672–679
नारायणस्य सर्वशरीरकत्वम् 680–683
अखिलहेयप्रत्यनीकत्वम् 685 उपासकलयस्थानप्रदर्शनम 686
प्रपञ्चस्य परमात्मप्रतिष्ठितत्वम् 693 गतिप्रकारकथनम् 694
वृत्त्युपदेशः 697 बाल्याद्युपदेशः 698
सर्वदाहेन मुक्तिप्राप्तिः 701 विद्यारक्षणोपदेशः 703

सुबालोपनिषद्गतानि ऋष्यादिनामानि

मृत्युः त्र्यक्षः खण्डपरशुः 615 अपान्तरतमः 683
ब्रह्मा 617 घोराङ्गिराः 683
विराजः " रैक्वः रामः "

शारीरके सुबालोपनिषद्वाक्यस्थलम्

सु ३. १-४-११—१२.

॥ शुभमस्तु ॥